# ।। संस्कृतप्रवेशिका ।।

सङ्ग्राहकः।
डा मुरलीश्यामः।
श्री सत्यसाई-मानव-अभ्युदय-विश्वविद्यालयः।
कल्बुर्गी कर्नाटकम्। 585313

The sanskrita praveshika book for beginners in Sanskrit. Collected and edited by Dr. Muralisham.H.

**Price-**

Published year 2021.
Publisher -self
Copies 50.

**Printer-**

Sai Printers
Basava Belagu house
Sharanappa Tadakkal lay out
Mahagaon Cross Kalburgi 858316

**Publisher-**

Dr. Muralisham H

Assistant Professor

Sri Sathya Sai University for Human Excellence

| | | |
|---|---|---|
| 1st Unit | ।। लकाराः।। | व्याकरणानुसारं दोषनिवारणम् ।दशलकारेषु। |
| 2nd Unit | ।। विभक्तयः त्रिषु लिङ्गेषु।। | त्रिषु लिङ्गेषु कौशलसम्पादनम्। |
| 3rd Unit | ।।पठनम्।। | छात्राणां पठनकौशलसम्पादनम्।। |
| 4th Unit | ।।लेखनम्।। | पत्रलेखनम्।। |

# ।।श्री सत्यसाई-मानव-अभ्युदय-विश्वविद्यालयः।।

## ।।संस्कृतविभागः।।

- सर्वेषां लकाराणाम् अध्ययनम्।
- व्याकरणानुसारं दोषनिवारणम् दशसु लकारेषु।

### 1.1 ।। लकाराः ।।

संस्कृतभाषायां विभिन्नकालस्य अर्थस्य च सूचनार्थं दशविधाः आख्यातप्रत्ययाः संयोज्य क्रियापदानि रचयन्ति । सामान्यतः कालः त्रिधा विभज्यते । क्रियमाणं कार्यं सूचयितुं वर्तमानकालस्य क्रियापदानि उपयुज्यन्ते । कृतं कार्यं सूचयितुं भूतकालस्य क्रियापदानि उपयुज्यन्ते । करिष्यमाणं कार्यं सूचयितुं भविष्यत्कालस्य क्रियापदानि उपयुज्यन्ते । किन्तु संस्कृते कालः षोढा (६) विभज्यते । पुनस्मारयतु लकाराणाम् विषये पूर्वस्मिन् कक्षायां भवान् वा भवती पठितवती। समयनशात् भाववशात् धातवः कृताः सन्ति। तेषां दशधा विभक्तिः अस्ति। ते च अग्रे प्रदत्तः।

- लट् – वर्तमाने । लङ् – अनद्यतनभूते । लिट् लकारः – परोक्षभूतकाले । लुङ् - तृतीयभूतकालः / सामान्यभूतकालः । लुट् - प्रथम-भविष्यत्कालः / अनद्यतनभविष्यत्कालः । लृट् - द्वितीय-भविष्यत्कालः / सामान्यभविष्यत्कालः। लेट् – वेदप्रयोगे , षट्-लकाराः इव चत्वारः अर्थाः सन्ति । लोट् – आज्ञार्थः ।
- विधिलिङ् – विध्यर्थः। आशीर्लिङ् – आशीरर्थः । लृङ् – सङ्केतार्थः।

क्रियाफलवशात् प्रत्ययाः भवन्ति। यदि क्रियायाः फलं परस्मै प्राप्नोति परस्मै पदी भवति। क्रियाफलम् आत्मने अर्थात् स्वयमेव प्राप्नोति आत्मनेपदी इति भवति। उदा

**क्रियाफले कर्तृगामिनी सति आत्मनेपदप्रत्ययाः ।।**
**अन्यगामिनी तु परस्मैपदप्रत्ययाः इत्यर्थः।।**

### 1.2 ।। लट् लकारः ।।

**।।कालपरिचयः।।**

लकाराः दशधा भवन्ति । एते दश लकाराः द्विधा विभक्ताः सन्ति । लट् लकारधातुरूप – संस्कृतव्याकरणे धातु इत्युक्ते क्रियाणां मूलरूपाणि। संस्कृते धातु विभिन्न लकारेषु भवन्ति। यथा लट् लकार (वर्तमान काल), लङ्लकार ( भूतकालः), लृट-लकार ((भविष्यतकालः), लोट-लकारविधिलिङ्-लकारः (सम्भावनार्थकः) (आज्ञार्थकः), इत्यादि।

1. सार्वधातुकाः / सविकरणकालार्थाः।
2. अर्धधातुकाः / अविकरणकालार्थाः।

तत्र लट् लकारः वर्तमानकालं बोधयति । प्रारब्धः अपरिसमाप्तश्च कालः वर्तमानकालः।

**अधोलिखितवाक्येषु क्रियापदानि रेखाङ्कितानि कुरुत।**

**यथा- छात्रः <u>पठति।</u>** **<u>छात्राः उपविशन्ति।</u>**

1. सीता नृत्यति । सीताः नृत्यन्ति।
2. गीता गायति। गीताः गायन्ति।
3. कोकिलः गायति। कोकिलाः गायन्ति।
4. मयूराः नृत्यन्ति। मयूराः नृत्यन्ति

5. हंसः तरति। हंसाः तरन्ति।

| पुरुषः | संज्ञा सर्वनाम | | | |
|---|---|---|---|---|
| प्रथमःपुरुषः | यथा सः सा तत्<br>तौ ते ते<br>ते ताः तानि | एकवचने<br>द्विवचने<br>बहुवचने | ति तः न्ति | ते इते अन्ते |
| मध्यमपुरुषः | त्वम् युवाम्<br>यूयम् | एकवचने<br>द्विवचने<br>बहुवचने | सि थः थ | से इथे ध्वे |
| उत्तमपुरुषः | अहम् आवां<br>वयम् | एकवचने<br>द्विवचने<br>बहुवचने | मि वः मः | अ+इ लभे<br>वहे, महे |

कतृपदानां समुचितक्रियापदैः सहमेलनं कुरुत।।

| **क** | **ख** |
|---|---|
| गावः | गीतं गायावः |
| वृक्षाः | संस्कृतं पठामि |
| मृगाः | इतस्ततः तृणं खादन्ति |
| ताः | पुस्तकानि सन्ति |
| ते | कन्दुकेन क्रीडन्ति |
| तानि | सन्ध्यावन्दनम् कुर्वन्ति |
| अहम् | सन्ध्यावन्दनम् करोति |
| आवाम् | देशसेवां कुरुत |
| वयम् | गायामः |
| त्वम् | गायत् |
| युवाम् | परहितं कुरुतः |
| यूयम् | क्षीरं यच्छन्ति। |
| सः | फलं दास्यन्ति |
| तौ | जलं पिबन्ति |
| ते | सन्ध्यावन्दनम् कुरुतः |

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्।** |
|---|---|---|---|
| प्रथमपुरुषः | ति | तः | न्ति |
| मध्यमपुरुषः | सि | थः | थ |
| उत्तमपुरुषः | आमि | आवः | आमः |

**उदाहरणार्थम्-हस् धातोः रूपाणि।**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्।** |
|---|---|---|---|
| **प्रथम**पुरुषः | हसति | हसतः | हसन्ति। |

| | | | |
|---|---|---|---|
| **मध्यमपुरुषः** | हससि | हसथः | हसथ । |
| **उत्तमपुरुषः** | हसामि | हसावः | हसामः। |

लेट लकारः छन्दो मात्र गोचरः। एतत् वेदे एव दृश्यते। लिङ् लकारस्तु द्विधा। आशिर्लिङ्ग विधिर्लिङ्। यद्यपि भवान् जानाति वर्तमानकाल-भूतकाल-भविष्यत्कालानां ज्ञापनाया केचन प्रत्ययानाम् उपयोगः क्रियते। ते तिङ् प्रत्ययाः भवन्ति। धातूनां तिङ् प्रत्ययानां योजनेन धूतुरूपाणि प्राप्स्यन्ते। तिङ् प्रत्ययेषु अष्टादश तिप् प्रत्ययाः भवन्ति।

यथा-

**।।परस्मैपद-प्रत्ययः।।**

| | (1) | (२) | (३४५...) |
|---|---|---|---|
| प्रथमपुरुष | तिप् | तस् | झि |
| मध्यमपुरुष | सिप् | थस् | थ |
| उत्तमपुरुष | मिप् | वस् | मस् |

अस्य लकारस्य अध्ययनाया अग्रिम खण्डिकां पठ्यताम्।

**।। बालो कस्मै न रोचते?।।**

कुटुम्बे यदा कश्चन शिशुः जायते तदा महोत्सवः भवति । यदा सः शनैः शनैः वर्धते तदा माता तं दृष्ट्वा भृषं **मोदते** यदा शिशुः ताम् ईक्षते निश्छलं हसति च तदा माता अतीव आनन्दम् अनुभवति। यदा बुभुक्षा जायते तदा शिशुः क्रन्दति अस्पष्टभाषया किञ्चिद् **भाषते** वा। माता तं बुभुक्षितं **मन्यते**।

शिशुः तस्याः दुग्धं याचते इति मन्यमाना माता शिशवे दुग्धं **दत्ते** सः तस्याः क्रोडे उपविश्य दुग्धं पिबति। तस्यः मनः तत्र नितरां **रमते**। यावत् शिशुः चन्द्रकलेव अनुदिनं परिवर्धते तावत् माता तस्य स्वास्थ्य विषये न शङ्कते। सा तस्य पालन-पोषणयोः कृते सततं यतते।स्वसन्ततेः कृते माता बहुविधं कष्टं **सहते** तथापि तस्याः मनसि उद्वेगः स्थानं न **लभते**। सा सम्यक् जानाति यत् सन्तत्या परिवारः शोभते।

शिशुः यदा बाल्यावस्थां प्राप्नोति तदा विद्यालयं गच्छति। प्रातः उत्थाय सः मातरं पितरं च **वन्दते**। यदा सः यौवनं लभते तदा धनोपर्जनाय वृत्तिं कुरुते।उपार्जितेन धनेन मातरं पितरं कुटुम्बं च **सेवते**। एवमेव सन्ततिः समाजे प्रतिष्ठां **विन्दते**।

**आत्मनेपदप्रत्ययः।**

| | (1) | (२) | (३४५...) |
|---|---|---|---|
| प्रथमपुरुष | ता | आताम् | झ |
| मध्यमपुरुष | थास् | आथाम् | ध्वम् |
| उत्तमपुरुष | इट् | बहिः | महिङ् |

तिप् प्रत्यय प्रभृति महिङ् पर्यन्तम् सर्वेषां योजनेन महिङ् प्रत्ययाः भवन्ति। सर्वे प्रत्ययाः सर्वदा न आयान्ति। पुरुष –वचनानुगुणम् एव प्रत्ययाः योजनीयः। दशलकाराः भवन्ति। लकारानुगुणं प्रत्ययाः भवन्ति। क्वचित् धातवः परस्मैपदी आत्मनेपदी भवन्ति।

| ***लट् लकारः वर्तमानकालः Present Tense*** | | | |
|---|---|---|---|
| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| ***प्रथमपुरुषः*** | **ति** | **तस् (तः)** | **अन्ति** |
| ***मध्यमपुरुषः*** | **सि** | **थस् (थः)** | **थ** |
| ***उत्तमपुरुषः*** | **मि** | **वस् (वः)** | **मस् (वः)** |

| | | |
|---|---|---|
| मोदते | प्रकाशते | कामयते |
| म्रियते | भासते | ईक्षते |
| वर्धते | ऊहते | एधते |
| ईहते | लज्जते | भाषते |
| शोभते | कम्पते | सेवते |
| शङ्खते | मन्यते | सहते |
| खिद्यते | पलायते | रमते |
| राजते | विद्यते | लभते |

**।। वन्द् धातोः लट् लकारे।।**

| | | | |
|---|---|---|---|
| प्र प्रुष | वन्दते | वन्देते | वन्दन्ते |
| म प्रुष | वन्दसे | वन्देथे | वन्दध्वे |
| उत्तम प्रुष | वन्दे | वन्दावहे | वन्दामहे |

प्र पु - शिशुः वन्दते| शिशू वन्देते| शिशवः वन्दन्ते |
म पु - त्वम् वन्दसे| युवाम् वन्देथे| यूयम् वन्दध्वे|
उ पु -अहम् वन्दे| आवाम् वन्दावहे| वयम् वन्दामहे|

### I. पाठवशात् रिक्तस्थानानि पूरयत।

- शिशुः कस्मै...........................।
- माता शिशवे दुग्धं ....................।
- माता बहुविधं कष्टं....................।
- सः मातरं पितरं च.....................।

| **एकवचनम्** | **बहुवचनम्** |
|---|---|
| जायते | |
| वर्धते | |
| रमते | |
| यतते | |
| सहते | |
| शोभते | |
| सेवते | |
| वर्तते | |

**ii.कर्मवाच्ये सर्वत्र आत्मने पदम् भवति।अधोलिखित वाक्यानि पठत।**

- अहं गृहं गच्छामि-मया गृहं **गम्यते।**
- सा गीतं पठति-तया गीता **पठ्यते।**
- अहं भोजनं करोमि-मया भोजनं **क्रीयते।**

**iii. अधोलिखितवार्तालापे आत्मनेपदि क्रियापदानि रेखाङ्कितानि कुरुत।**

**रामः –** भो कृष्ण किं गृहं गम्यते?
**कृष्णः** - आम् गच्छामि ननु किं त्वया न आगम्यते।
**रामः -** अहं तु पितृव्यगृहं गच्छामि
**कृष्णः** - किम् पुस्तकानि अपि तत्रैव नीयन्ते।
**रामः -** आम् रात्रौ गृहकार्यं करिष्यामि।
**कृष्णः** - किम् लतया अपि न आगम्यते।
**रामः** - आम्। एषा अपि आगच्छति।

## 1.3 ||लङ् लकारः||

### || लालबहुदूरशास्त्री महोदयः||

श्रीलालबहदुरशास्त्री स्वतन्त्रभारतस्य द्वितीयः प्रधानमन्त्री आसीत्। सः उत्तरप्रदेशे 1904 तमे वर्षे अक्टूबर मासस्य द्वितीये दिनाङ्के जनिम् **अलभत।** तस्य पिता निर्धनः **अवर्तत।** अतः यथाकथञ्चिद् परिवारस्य भरणपोषणम् **अकुरुत।** यदा लाल बहादूरः सार्धैकवर्षीयः अभवत् तदा तस्य पिता अपि दिवं गतः। एवं तस्य बाल्यावस्था महान् कष्टेन अतिवाहिता अभवत्। लालबहदूरशास्त्रिमहोदयाय अध्ययनम् अतीव **अरोचत**। परन्तु पुस्तकानि लेखनसामग्रीं च क्रेतुं तस्य पार्श्वे आवश्यकं धनं न अविद्यत। सः कश्चित् विद्याव्यसनी पुस्तकप्रियः च अवर्तत। अतः पुस्तकानि पठित्वा तस्य चेतः भृशम् **अमोदत।** परन्तु धनाभावात् पुस्तकानि क्रेतुम् असमर्थः अपि स्वाभिमानी सः न कदापि स्वसहायपाठिभ्यः पुस्तकं धनं वा **अयाचत।**

भारतमातुः पराधीनतां दृष्ट्वा लालबहदूरः व्यथितः आसीत्। अतः विद्याप्रियः अपि सः षोडशवर्षदशीयः विद्यालयीयं नियमितम् अध्ययनं परित्यज्य महात्मागान्धिनः आह्वानेन असहयोगआन्दोलने भागम् **अकामयत।** तस्मिन् आन्दोलनक्रमे सः कारावासम् अपि प्राप्तवान्। ततः प्रभृति सः अन्यैः देशभक्तैः सह देशस्य स्वतन्त्रतायै निरन्तरम्
आङ्ग्लशासकैः **अयुध्यत।**

**i. पाठाधारेण रिक्तस्थानानि पूरयत।**

1. लालबहदूरशास्त्रिणः उत्तरप्रदेशे..............................।
2. तस्य पिता निर्धनः..............................................।
3. शास्त्रीमहोदयाय अध्ययनम् अतीव .........................।
4. तस्य पार्श्वे आवश्यकं धनं न ..................................।
5. तस्य चेतः भृशम् ..............................................।

**यत् कार्यम् अद्यतनात् पूर्वं भूतम् तत् लङ्।**

| | | |
|---|---|---|
| अभवत् | अभवताम् | अभवन् |
| अभवः | अभवतम् | अभवत |
| अभवम् | अभवाव | अभवाम |

**ii. अधोलिखितानि पठत।**

- आसीत् राजा नलो राम।
- बालकः ह्यः मातुलगृहम् अगच्छत्।
- अहम् एकदा वने चरन् अपश्यम्।

एतानि वाक्यानाम् भावः जानातु। अत्र क्रिया कदा जाता? अद्य वा अद्यतनात् पूर्वं वा? अद्यतनात् पूर्वम् भवति। भूतकालक्रियापदानां निर्माणे अ वर्णस्य योगः अस्ति। पश्यतु,

| iii. वर्तमानकाले | भूतकाले |
|---|---|
| गच्छति | अगच्छत्। |
| पठति | अपठत्। |
| स्मरति | अस्मरत्। |

एतेषु किम् परिवर्तनम् जातम्। क्रियापदे पूर्वं किम् योजितम्?

**उपसर्गात पूर्वमेव अ योजनीयः।**

| क्रियापदम् | उपसर्गः | धातुः | लकारः लङ् | पुरुषः वचनम् |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| अगच्छः | आ | गम् | लङ् | मध्यम एकवचनम् |
| | | | | |
| | | | | |
| | | | | |
| | | | | |

| **लङ् लकारः भूतकालः Past Tense** | | | |
|---|---|---|---|
| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्रथमपुरुषः** | **त्** | **ताम्** | **अन्** |
| **मध्यमपुरुषः** | **स्** | **तम्** | **त** |
| **उत्तमपुरुषः** | **अम्** | **व** | **म** |

**|| 1857 ख्रीष्टाब्दस्य स्वातन्त्र्यसङ्ग्रामः||**

अस्माकं राष्ट्रम् इदानीं स्वततन्त्रम् अस्ति। किं वयम् जानीमः यत् अस्माकं पूर्वजैः एतत् स्वातन्त्र्यं कियत् कष्टेन **अलभ्यत ?** इति। स्वातन्त्र्याय अस्माकं पूर्वजैः महान् प्रयत्नः **अक्रियत।** सर्वैः जानन्ति यद् वैदेशिकैः यद्यपि अस्माकं राष्ट्रं प्रथमतः वाणिज्यकारणात् आगम्यत। किञ्च क्रमेण तैः अत्रत्यं शासनम् अपि अधिकर्तुं प्रायत्यत।यदा प्रभृति आङ्ग्लैः जनैः अत्रत्यं शासनं स्वहस्ते **अगृह्यत** तदा प्रभृति एव भारतीयानाम् अङ्ग्लजनानां च क्रमेण प्रतिरोधः **आरभ्यत।** किञ्च आरम्भे क्वचित् जनैः एषः प्रतिरोधः लघुरूपेण एव **समारभ्यत।**

**1857 तमे** ख्रीष्टाब्दे भारतीयैः आङ्ग्लजनान् प्रति कश्चन विशिष्टः प्रतिरोधः विद्रोहः **अक्रियत।** एषः विद्रोहः 1857 तमे मई मासस्य दशमे दिनाङ्के मेरठ नगरे सैनिकैः **समारभ्यत।** विद्रोहस्य द्वितीये दिवसे मेरठतः सैनिकैः देहलीं प्रति **प्रस्थीयत।** देहलीं समागत्य देहलीस्थैः सैनिकैः अपि विद्रोहं प्रति साहय्यम् **अर्चयत।** देहल्यां सैनिकैः बहादुरशाहजाफर भारतवर्षस्य साम्राट् उद्घोषयत। अनन्तरम् एषः विद्रोहः आभारतम् व्याप्नोत्। सम्पूर्णे भारते आङ्ग्लशासनस्य विरोधः **समारभ्यत।** अनेन विद्रोहेण विविधमतावलम्बिनं जनानाम् ऐक्यं समवर्धत। यद्यपि एषःआङ्ग्लशासनः क्रूरतया **अदम्यत** तथापि अनेन विद्रोहेण भारतस्य आङ्गलशासनं प्रति प्रथमस्वातन्त्र्यसङ्ग्रामरूपेण दूरगामी प्रभावः **समुपाद्यत।**

**i. पाठाधारेण रिक्तस्थानानि पूरयत।**

1) आङ्गलजनानां प्रतिरोधः.......................।
2) भारतीयैः विद्रोहः...............................।
3) सैनिकैः एषः विद्रोहः ...........................।
4) दूरगामी प्रभावः..................................।

**ii. आत्मने पदे पश्यामः -**

- ☐ सेवते – असेवत।
- ☐ याचते – अयाचत।
- ☐ कुरुते – अकुरत।

## iii. आत्मने पदे अन्यपुरुषे एकवचने अन्ते अ भवति।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र पु | अवन्दत | अवन्देताम् | अवन्दन्त। |
| म पु | अवन्दथाः | अवन्देथाम् | अवन्दध्वम्। |
| उ पु | अवन्दे | अवन्दावहि | अवन्दामहि। |

**प्र पु अलभत** ............................ ..................
**म पु** ............ .............................. ...................
**उ.पु** ............. .............................. ...................

**iii. अधोलिखितक्रियापदेषु आत्मनेपदे लङ्लकारस्य क्रियापदानि रेकाङ्कितानि कुरुत।**

1. अचिन्तयत् अचिन्तयत ।
2. अपालयत् अपालयत ।
3. अनयत् अनयत।
4. ........... अवर्तत ।
5. ............ अलभत ।
6. ............ असेवत ।
7. ............ अमोदत ।

**iv. अधोलिखितानां कर्माणि प्रयोगाणां कर्तरि रूपाणि लिखत।**

- o अलभ्यत अलभत ।
- o अक्रियत .................।
- o आरभ्यत .................।
- o आगम्यत .................।
- o आर्चयत .................।

| परस्मैपदिरूपाणि | आत्मनेपदिरूपाणि |
|---|---|
| पठति | विद्यते |
| तिष्ठति | लभते |
| लिखति | कम्पते |
| हसति | एधते |
| वदति | वर्धते |
| नृत्यति | शोभते |
| | राजते |

- o अयाच्यत ................।

**v. ।।कोष्ठके दत्तैः सोपसर्गैः धातुभिः रिक्तस्थानानि पूर्यन्ताम्।।**

1. खगाः जालमादाय आकाशे ......................................। (उत् +पत्)
2. एकदा एकः कृष्णः सर्पः कोटरे ...................................। (प्र +विश)

3. सः ...........................(प्रति +वद् )नाहं गर्वं करोमि इति|
4. छात्रः पुरस्कारं ..................................................| (प्र +अप्)
5. बुद्धः सर्वं परहिताया.................................................| (उत् +सृज्)
6. सः सर्वत्र धर्मप्रचाराय................................................| (वि + हृ)

**vi. एतत् सम्भाषणं पठित्वा रेखाङ्कितक्रियापदानि अधोनिर्दिष्टेषु कोष्ठकेषु वर्गीकृत्य लिखत||**

**गीता** - ह्यः त्वम् किमर्थम् विद्यालयं नागच्छः?
**माला** - ह्यः अहम् मातुल गृहम् अगच्छम्|
**गीता** - त्वया सह के के अगच्छन्?
**माला** –सर्वे कुटुम्बसदस्याः एव अगच्छन्|
**गीता** – किम् तत्र विशेष कार्यक्रमः आसीत्?
**माला** – तत्र गृहप्रवेशोत्सवः आसीत्| अतः वयं सर्वे अगच्छाम|
**गीता** – त्वं तत्र किम् किम् अकरोत्?
**माला** – मम माता यत् यत् आदिशत् तत् तत् अहम् अकरवम्|
**गीता** – तव माता भगिनी च किम् किम् अकुरुताम्?
**माला**- ते अतिथीन् अभ्यवादयताम् सर्वान् च मिलित्वा प्रासीदताम्|

| **vii. लङ् (आत्मनेपदम्)** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्|** |
|---|---|---|---|
| प्रथमपुरुषः | त (अत) | एताम् | अन्त |
| मध्यमपुरुषः | थाः (अथाः) | इथाम् | ध्वम् (अध्वम्) |
| उत्तमपुरुषः | ए | आवहि | आमहि |

अशोचत् अशोचताम् अशोचन्
अशोचः अशोचतम् अशोचत
अशोचम् अशोचाव अशोचाम

अगदत् अगदताम् अगदन्
अगदः अगदम् अगदत
अगदम् अगदाव अगदाम

अनन्दत अनन्दताम् अनन्दन्
अनन्दः अनन्दतम् अनन्दत
अनन्दम् अनन्दाव अनन्दाम

आर्चत् आर्चताम् आर्चन्
आर्चः आर्चतम् आर्चत
आर्चम् आर्चाव आर्चाम

अव्रजत् अव्रजतम् अव्रजत
अव्रजः अव्रजतम् अव्रजत
अव्रजम् अव्रजाव अव्रजाम

अपिबत् अपिबताम् अपिबन्
अपिबः अपिबतम् अपिबत
अपिबम् अपिबाव अपिबाम

अनयन् अनयताम् अनयन्
अनयः अनयतम् अनयत
अनयम् अवयाव अनयाम

अशृणोत् अशृणुताम् अशृण्वन्
अशृणोः अशृणुतम् अशृणुत
अशृण्वम् अशृणुव अशृणुत

आसीत् आस्ताम् आसन्
आसीः आस्तम् आस्त
आसम् आस्व आस्म

अगच्छत् अगच्छताम् अगच्छन्
अगच्छः अगच्छतम् अगच्छत

अगच्छम् अगच्छाव अगच्छाम

| | |
|---|---|
| अददत अददेताम् अददन् | अहरत् अहरताम् अहरन् |
| अददथाः अददेथाम् अददध्वम् | अहरः अहरतम् अहरत |
| अददे अददावहि अददामहि। | अहरम् अहराव अहराम |

## 1.4 ||लोट् लकारः||

**i. अधोलिखितवाक्यानि पठत।**

शृणुत रे छात्राः <u>आह्वयन्तां</u> सर्वे राजानः। <u>आनीयताम्</u> स दूतः। भो वटवः। <u>नयत</u> एनमश्वम्। अत्र रेखाङ्कितपदेषु सर्वत्र आदेशः दीयते। यत्र आदेशस्य अभिप्रायः। तत्र लोट् लकारः।

**ii. अधोलिखितेषु लोट् लकारे प्रयुक्तानि क्रियापदानि रेखाङ्कितानि कुरुत।**
**अध्यापकः - "छात्राः! उत्तिष्ठत जाग्रत मा स्वप्त प्राप्तववरान् निरबोधत।"**

- छात्राः उत्तिष्ठत।
- हस्तौ उपरि कुरुत।
- हस्तौ अधः कुरुत।
- वामेन हस्तेन दक्षिणं कर्णं कुरुत।

| **iii. कर्तरीप्रयोगः** | **कर्मणिप्रयोगः** |
|---|---|
| भवती कर्तव्यं स्मरतु। | भवत्या कर्तव्यं स्मर्यताम्। |
| शिशुः दुग्धं पिबतु। | शिशुना दुग्धं पीयताम्। |
| भवत्यः उपहारं ददतु। | भवतीभिः उपहारः दीयताम्। |
| यूयं विषयं जानीत। | युष्माभिः विषयः ज्ञायताम्। |

### iv.|| ऋषयो मन्त्रद्रष्टारः ||

लोककल्याणप्रसङ्गे ऋषीणां भूमिका उल्लेखयोग्या वर्तते। वैदिकमन्त्रेषु तेषाम् उपदेशाः लोककल्याणभावनाश्च सङ्कलिताः वर्तन्ते। ते च ऋषयः मन्त्रान् प्रणीतवन्तः इति न **मन्यन्ताम्।** वस्तुतः ते मन्त्रान् दृष्टवन्तः। अतः एव ऋषयो मन्त्रदृष्टारः इति काचित् सूक्तिः प्रसिद्ध्यति। वेदेषु उपनिषत्सु पुराणेषु च सर्वां मानवजातिम् उपदिशन्ति। भो मानवाः ! सम्पूर्णा धरा अस्माकं कुटुम्बःइति उदात्ता भावना युष्मासु **जायताम्।** सर्वे कल्याणं श्रेयः च **लभन्ताम्।** भवत्सु दैवगुणाः **वर्धन्ताम्।** सद्भावनाः **समेधन्ताम्।** दुर्भवानाः **क्षीयन्ताम्।** ईश्वरः एक एव। तस्य नाना नामरूपाणि स्वीकृत्य कलहं विवादं वा मा **कुरुद्ध्वम्।** धर्मः अर्थः कामः मोक्षः च इति चत्वरः पुरुषार्थाः मानवजीवनस्य लक्ष्याः सन्ति। अतः सर्वे चतुर्षु पुरुषार्थेषु **यतन्ताम्।** कुटुम्बं समाजं राष्ट्रम् विश्वं च निस्वार्थभावनया **सेवन्ताम्।** ऋषयः लोककल्याणाय ईश्वरं प्रार्थयन्ते। भो दयानिधे ! सर्वे प्राणिनः आनन्दं **लभन्ताम्।** मानवानां सर्वविधानि दुःखानि **क्षीयन्ताम्।** सर्वेषां हृदि दिव्यं ज्ञानं **प्रकाशताम्।**

**v. पाठाधारेण रिक्तस्थानानि पूरयत।**

1) दिव्यं ज्ञानं ..................................।
2) सर्वविधानि दुःखानि........................।
3) प्राणिनः आनन्दं ............................।
4) भवत्सु दैवगुणाः ............................।
5) चतुर्षु पुरुषार्थेषु .............................।

**vi. निमन्त्रणार्थे लोट्।**

⇒ अद्य भवान् मम गृहे भोजनं करोतु।
⇒ आगच्छ सह एव खेलं पश्याव।
⇒ भो दूत ! एतदासनम्। आस्ययताम्।

| **vii. प्र पुरुषः** | भवतु, भवतात् | भवताम् | भवन्तु |
|---|---|---|---|

| | | | |
|---|---|---|---|
| म. पुरुषः | भव, भवतात् | भवतम् | भवत |
| उ. पुरुषः | भवानि | भवाव | भवाम |

| लोट् लकारःअनुज्ञा(Imperative Mood) | | | |
|---|---|---|---|
| पुरुषः | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | **तु /तात्** | **ताम्** | **अन्तु** |
| मध्यमपुरुषः | **अ तात्** | **तम्** | **त** |
| उत्तमपुरुषः | **आनि** | **आव** | **आम** |

**viii. अधो लिखिते श्लोके लोट् लकारे प्रयुक्तानि क्रियापदानि रेखाङ्कितानि कुरुत।**

**निन्दन्तु नीतिननिपुणाः यदि वा स्तुवन्तु। लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वामरणमस्तु युगान्तरे वा। न्यायात्पथः प्रविचलन्ति पदं न धीराः।।**

**Ix आमन्त्रण-अर्थे** अपि लोट् लकारः प्रयुज्यते। यथा-

| **वर्तमाने** | **लोट्** |
|---|---|
| सः आगच्छति | त्वम् आगच्छ। |
| सः उपविशति | त्वम् उपविश। |
| सः वदति | त्वम् वद। |
| सः नमति | त्वं नम। |

- माम् अस्याः विपदः <u>रक्षतु</u> भवान्
- त्य<u>ज</u> दुर्जनसंसर्गं <u>भज</u> साधुसमागमम्
- <u>त्राहि</u> मां त्रा<u>हि</u> माम् <u>जयतु जयतु</u> देवः।।

उपर्युक्तउदाहरणानि अनुसृत्य रिक्तस्थानानि प्रदत्तक्रियापदैः पूरयत।

**क्रियापदानि (गच्छतु , रक्ष, देहि, ब्रूहि , सेवस्व, अनुयाहि , उद्धर।)**

1. मम सङ्कटेभ्यः ..............................................................।
2. हे मित्रम् !.... ..............................................मे प्रतिवचनम्।
3. राम माम् .......................................................................।
4. सत्यं ............., ..................साधुपदवीम्..............विद्वज्जनम्।
5. एषा स्वयं ..................................................भरतम् आनेतुम्।

## X. आशीर्वादार्थे लोट्।

- गच्छ विजयी भव ।
- शिवाः सन्तु ते पन्थानः।
- सदारपुत्रः राजपुत्रः जीवतु।
- आयुष्मान् भव।
- चिरं जीव।
- यशस्वी भव।

## Xi प्रश्ने सामर्थ्ये च लोट् ।

**अधोलिखितानि वाक्यानि पठ-**

- किं ते प्रियं करवाणि?
- किम् ददानि?

अत्र ददानि करवाणि इत्यादि।

**प्रदत्तक्रियापदैः रिक्तस्थानं पूरयन्तु।** (पिबानि, आनयानि, लिखानि, प्रोञ्छयानि, प्रविशानि,पठानि)

**उदा-** आचार्ये किमहम् बहुर्गच्छानि?

- आचार्य ! किमहम् जलम् .................................।
- आचार्य !  किमहम् सुधाखण्डेन .........................।
- आचार्य ! किमहम् पुस्तकम्..............................।
- आचार्य ! श्वेतफलम्........................................।

**भवता पठितम् यथा-** लोट् प्रयुज्यते -

- ❖ आदेशार्थे।
- ❖ निमन्त्रणार्थे।
- ❖ आमन्त्रणार्थे।
- ❖ आशीर्वादार्थे।
- ❖ प्रश्ने च सामार्थ्ये च।

**अपि च अस्मिन् श्लोके पश्य-**

अन्यथा शरणं नास्ति त्वमेव शरणं मम।
तस्मात् कारुण्य भावेन रक्ष रक्ष परमेश्वर।

## 1.5 ||सम्भावनायां विधिलिङ्||

**I . विधिलिङ्-उपयुज्यते।-**

- **सम्भावानायां विधिलिङ्।**
- **यत् कार्यमुचितं स्यात् तत्र विधिलिङ्।**
- **उपदेशे विधिलिङ्।**
- **इच्छार्थे विधिलिङ्।**
- **प्रवृत्तिपरं वाक्यं विधिः विध्यर्थे च।**

## ||वयं मिलित्वा कार्यं कुर्मः||

वरदा- हरिः ओम्, शारदा खलु ?
शारदा आम् वदतु, कः विशेषः
वरदा सर्वं कुशलम् । भवती किमर्थं ह्यस्तनं मेलनं न आगतवती?
शारदा- क्षम्यताम् । मया अन्यत्र गन्तव्यम् आपतितम्। अतः एव नागतवती । मेलने के के निर्णयाः स्वीकृताः?
वरदा –प्रायः सर्वाणि कार्याणि चिन्तितानि उत्तरदायित्वानि अपि निश्चितानि।
शारदा- भगिनी, कस्यै किम् उत्तरदायित्वं दत्तम्?
वरदा –सभाकार्यं नलिनी **पश्येत्।** तस्याः साहाय्यार्थं **कुर्यात्।** लतिका शुभा च पानजलं **वितरेताम्।** कार्यक्रमसञ्चालनं लक्ष्मीः **कुर्यात्।**
शारदा- भगिनि वैयक्तिकगीतं गायेत्। विजया स्वागतं विदिता धन्यवादं च **व्यवहरेताम्।**
वरदा-वरदे अहं किं **कुर्याम्?**
वरदा –कार्यक्रमविवरणपत्रं सिद्धं **कुर्यात्।** तत्र दोषाः न **स्युः।**
शारदा- अस्तु तथैव करिष्यामि।
वरदा- पुनः भवती गीतमपि **सूचयेत्।** यतः प्रार्थनां सा **गायेत्।** सा ह्यः नागता आसीत्।
शारदा- भवतु अवश्यं कथयिष्यामि।
वरदा- भवती समये एव **आगच्छेत्।**वयं सर्वाः अपि मिलित्वा कार्यक्रमं सम्यक् **कुर्याम।**
**शारदा-** निश्चयेन। धन्यवादः।

**ii. अधोलिखितानि वाक्यानि पठतु।**

1. भवान् विद्यालयं समये प्राप्नुयात्।
2. सर्वेऽपि गृहपाठान् अवश्यं लिखेयुः।
3. छात्रः अध्यापकान् न उपहसेत्।
4. सेवकाः कार्यं कुर्युः।
5. भवती अद्य एव दूरवाणीं कुर्यात्।
6. वयं कार्यक्रमं सम्यक् कुर्याम।

**भू धातु, विधिलिङ् लकार।**

| | | |
|---|---|---|
| **भवेत्** | भवेताम् | भवेयुः। |
| भवेः | भवेतम् | भवेत । |
| भवेयम् | भवेव | भवेम। |

| ||विधिर्लिङ् लकारः|| | | | |
|---|---|---|---|
| ***पुरुषः*** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| ***प्रथमपुरुषः*** | **एत्** | **एताम्** | **एयुः** |

| | | | |
|---|---|---|---|
| ***मध्यमपुरुषः*** | **एः** | **एतम्** | **एत** |
| ***उत्तमपुरुषः*** | **एयम्** | **एव** | **एम** |

एधेत एधेताम् एधेरन्।
एधेथाः एधेयाथाम् एधेध्वम्।
एधेय एधेवहि एधेमहि।

वर्धेत वर्धेताम् वर्धेरन्
वर्धेथाः वर्धेयाथाम् वर्धेध्वम्
वर्धेय वर्धेवहि वर्धेमहि।

लभेत लभेयाथाम् लभेरन्
लभेथाः लभेध्वम् लभेध्वम्
लभेय लभेवहि लभेमहि

कुर्याम् कुर्याव कुर्याम
कुर्याः कुर्यातम् कुर्यात
कुर्यात् कुर्याताम् कुर्युः

| लट्-लकारः | लङ्-लकारः | विधिलिङ्लकारः |
|---|---|---|
| वर्तते | अवर्तत | वर्तेत |
| लभते | अलभत | लभेत |
| जायते | अजायत | जायेत |
| शोभते | अशोभत | शोभेत |
| कम्पते | अकम्पत | कम्पेत |

**i. सम्भावानायां विधिलिङ्।** अत्र क्रियायाः सम्पादने सम्भावना वर्तते, न तु आदेशः।अत्र विधिलिङ् प्रयोगः।

- सम्भवतः अहं विदेशं गच्छेयम्।
- कदाचित् आचार्यः विद्यालयं न आगच्छेत्।
- गुरुश्चेत् इच्छेत् अहं छात्रावासे वसेयम्।

**ii. अधोलिखित रिक्तस्थानानि प्रदत्तक्रियापदैः पूरयत। (नयेत्, कुर्याम् ,भवेत्, आनयेत्, गच्छेम)**

- सम्भवतः अद्य वृष्टिः ...................................................।
- सम्भवतः अद्य पत्रवाहकः मम धनादेशम्..............................।
- सम्भवतः वयम् अद्य प्रदर्शिनीं द्रष्टुं........................................।
- सम्भवतः मम पिता माम् अपि विदेशं ..................................।
- बहुशः परीक्षा परं व्यापारमेव .............................................।

**iii.यत् कार्यमुचितं स्यात् तत्र विधिलिङ्।**

त्वं साधूनां सेवां कुर्याः। सत्यं वदेत्। उद्याने अवकरं मा क्षिपेः।
अत्र जनाः कानिचित् आवाञ्छितकार्याणि कुर्वन्ति।तान् प्रति निर्देशवाक्यानि लिखत।

**iv.निर्देशवाक्यानि लिखत।**

**उदा-** जनाः उच्चैः हसन्ति।
**निर्देशनवाक्यानि-** जनाः उच्चैः न हसेयुः।

1. निर्देशनवाक्यम्-...................................।
   बालकाः भोजनात् पूर्वं हस्तौ न प्रक्षालयन्ति।
2. निर्देशनवाक्यम्-...................................।

छात्राः कक्षां न अलङ्कुर्वन्ति।
3. निर्देशनवाक्यम्-....................................।
पुस्तकालये छात्राः वार्तालापं कुर्वन्ति।
3. निर्देशनवाक्यम्--...................................।
शिशवः वाटिकायां पुष्पाणि त्रोटयन्ति।
4. निर्देशनवाक्यम्-....................................।

**उपदेशे विधिलिङ् ।-**

⇒ सत्यं ब्रूयात्। प्रियं ब्रूयात्।

⇒ उदाहरणानुसारम् अधोलिखितेषु विधिलिङ् क्रियापदानि रेखाङ्कितानि कुरुत।

⇒ न वै स्वयं  तत् अश्नीयात् अतिथिं यत् न भोजयेत्।

⇒ सुखार्थी वा त्यजेत् विद्यां  विद्यार्थी चेत् सुखं त्यजेत् सुखम्।

⇒ सुखार्थिनःकुतो विद्या विद्यार्थिनः कुतः सुखम्।

⇒ सहसा विदधीत न क्रियाम्।

**इच्छार्थे विधिलिङ्।**

भवान् शीघ्रं नीरोगो भवेत्। वयं प्रातः ईश्वरं स्मरेम।

**अधोलिखितवाक्येषु क्रियापदानि योजयेत। (करवाम मारयेयम् भवेत् प्राप्स्येत् भवेयुः)**

1. भवान् शीघ्रम् उन्नतिं ..........................................।
2. अस्माकं देशे पण्डिताः समदर्शिनः..........................।
3. अस्माकं देशः कदापि पराधीनः न ...........................।
4. अहम् अपि युद्धे शत्रून् .........................................।
5. वयम् आहतानां चिकित्सां ....................................।

## प्रवृत्तिपरं वाक्यं विधिः विध्यर्थे च।

ब्रह्मचारी मधुमांसं च <u>वर्जयेत्</u>। दिवा न <u>स्वाप्यात्</u>। निर्दोषं न <u>दण्डयेत्।</u> ये च नियमाः जीवनं अनुशासति ते एव  विधि इति कथ्यन्ते।

**एवमेव अधोलिखितेषु विधिलिङ् क्रियापदैः रिक्तस्थानानि पूरयत।**

1. असत्यं न ....................................................।
2. द्यूतं न .......................................................।
3. गृहात् बहिः सरण्याम् अवकरं न..........................।
4. विद्यालये यथासमयं ........................................।
5. अधर्माचरणं न ..............................................।

**श्लोके विधिलिङ् क्रियापदानि रेखाङ्कितानि कुरुत।**

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।
सद्भिर्विवादं मैत्री च नासद्भिः किञ्चिदाचरेत्।।

**विधिलिङ् क्रियापदैः रिक्तस्थानानि पूरयत।**

1. छात्राः सदा सत्यं .....................................................।  (वद)
2. सः भोजने शयने श्रवणे सर्वत्र संयमम् .............................। आ चर
3. अभिवादनशीलः वृद्धोपसेवी..........................................। अस्-भुवि
4. गुरुप्रियः भवितुम्.......................................................। यत्

5. सज्जनानाम् सङ्गतिं .......................................................। कृ

**अधः प्रदत्तानि सुभाषितानि पठत।**

गते शोकं न कुर्वीत भविष्यं नैव चिन्तयेत्।
वर्तमानेषु कालेषु वर्तयन्ति विचक्षणः।
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम्।
न हि प्रतीक्षते मृत्युः कृतमद्य न वा कृतम्।

## 1.6 ।।लुट् लकारः।।

।।भू धातुः, लुट् लकार।।

| | | | |
|---|---|---|---|
| **प्र पुरुषः** | भविता | भवितारौ | भवितारः । |
| म पुरुषः | भवितासि | भवितास्थः | भवितास्थ। |
| म पुरुषः | भवितास्मि | भवितास्वः | भवितास्मः। |

| ***लुट् लकारः First future Tense Periphrastic*** | | | |
|---|---|---|---|
| ***पुरुषः*** | **एकवचनम्** | **द्विवचनम्** | **बहूवचनम्** |
| ***प्रथमपुरुषः*** | **ता** | **तारौ** | **तारम्** |
| ***मध्यमपुरुषः*** | **तासि** | **तास्थः** | **तास्थ** |
| ***उत्तमपुरुषः*** | **तास्मि** | **तास्वः** | **तास्मः** |

**सप्रयोगः**

1. अयं मुनिः श्वः तस्यां पर्णशालायां भविता।(यह मुनि कल उस झोपड़ी में होगा।)
2. अमू ब्रह्मचारिणौ परश्वः प्रार्थनालये भवितारौ। (वे दोनों वेदपाठी परसों उस प्रार्थनालय में होंगे।)
3. अमी जनाः श्वः प्रार्थनालये भवितारः।(वे वेदपाठी कल इन प्रार्थनालये में होंगे।)
4. त्वं परश्वः उपाध्यायेन सह पर्णशालायां भवितासि।(तुम परसों अध्यापक के साथ पर्णशाला में होगे।)
5. युवां श्वः चैत्ये भवितास्थः। (तुम दोनों कल यज्ञशाला में होगे।)
6. तत्र छान्दसानां सामगानं भविता।(वहाँ वेदपाठियों का सामगान होगा।)
7. यूयं परश्वः उटजे भवितास्थ।(तुम सब परसों कुटिया में होगे।)
8. तत्र अगदतन्त्रस्य व्याख्यानं भविता।(वहाँ अगदतन्त्र का व्याख्यान होगा।)
9. अहं श्वः तस्मिन् उटजे भवितास्मि।(मैं कल उस कुटी में होऊँगा।)
10. तस्मिन् एव द्वौ उपाध्यायौ भवितारौ।(उसी में दो उपाध्याय होंगे।)
11. आवां परश्वः तस्मिन् चैत्ये न भवितास्वः।(हम दोनों परसों उस चैत्य में नहीं होंगे।)
12. वयं श्वः छान्दसानाम् उटजेषु भवितास्मः ।(हम सब कल वेदपाठियों की कुटी में होंगे।)
13. तत्र एव ऋग्वेदस्य जटापाठः भविता।(वहीं ऋग्वेद का जटापाठ होगा।)
14. अध्यापकाः अपि तत्र एव भवितारः।(उपाध्याय लोग भी वहीं होंगे।)
15. वयम् अपि तत्र एव भवितास्मः।(हम लोग भी वहीं होंगे।)

**श्लोक :**

न जायते म्रियते वा कदाचित् नायं भूत्वा भविता वा न भूयः।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥

( श्रीमद्भगवद्गीता २।२०॥ )

**लुट्**

प्र पु - ता तारौ तारः
म पु - तासे तासाथे ताध्वे
उ पु- ताहे तास्वहे तास्महे

# 1.7 ।।लृट् लकारः।।

अस्माकं देशः यदा आङ्ग्लशानाधीनः आसीत् तदानीम् अस्माकं देशस्य स्वातन्त्र्यसेनान्यः आत्माहुतिं दत्वा देशस्य स्वतन्त्रप्राप्तये प्रयतन्त। तेषाम् एताः आशाः अवर्तन्त। यदा भारतं स्वातन्त्र्यं लप्स्यते तदा भारतीयाः स्वातन्त्र्यगौरवं **धरिष्यन्ते।** राष्ट्रे नवा चेतना नवा स्फूर्तिः च प्रकीशिष्यते। वैदेशिकाः राष्ट्रस्य सम्पत्तिं नैव हरिष्यन्ते। राजनेतारः प्रजानां कल्याणं **कामयिष्यन्ते**। प्रजाः राष्ट्रस्य उन्नतये **प्रयतिष्यन्ते।** कृषकाः व्यापरिणः सेवरताः च देशसेवां **सेविष्यन्ते।** सर्वे **समेधिष्यन्ते।** परस्परं न कोऽपि **शङ्किष्यते**। वयं भारतीयाः वयं स्वतन्त्राः इति सर्वेषां मनसि आत्मसम्मानं जनिष्यते। धर्मभेदः भाषाभेदः स्थानभेदः च राष्ट्रस्य ऐक्यं भावनां न **बाधिष्यन्ते** इति। एवम् एताः आशाः हृदि निधाय स्वातन्त्र्यसेनान्यः आत्मानः सर्वम् उत्सृज्य अस्मभ्यं स्वातन्त्र्यम् अदापयन्। वयं सर्वे भारतीयाः तेषां भावनानाम् आशानां च अनुरूपं **प्रयतिष्यामहे।** यदि वयम् एवं **सङ्कल्पिष्यामहे** तदनुगुणं **वर्तिष्यामहे** च तदा एव स्वातन्त्र्यसेनान्यः प्रति समुचितः श्रद्धाञ्जलिः **वर्तिष्यते।**

## भविष्यत्कालस्य अभ्यासः।

1) भारतीयाः स्वातन्त्र्यगौरवं ................................।
2) राष्ट्रस्य सम्पत्तिं नैव .........................................।
3) प्रजानां कल्याणं ............................................।
4) सेवरताः देशं.................................................।
5) समुचितः श्रद्धाञ्जलिः........................................।

**या क्रिया आगमिनी सम्भाविता तत्र लृट्।**

⇒ मम पिता अद्य आगतः, सः श्वः <u>गमिष्यति।</u>
⇒ अद्य सोमवासरः, श्वः मङ्गलवासरः <u>भविष्यति।</u>
⇒ अद्य मम उपवासः श्वः भोजनं <u>करिष्यामि।</u>
⇒ श्वः मम उत्सवः अहम् पारितोषिकं <u>लप्स्ये।</u>

**<u>।। रेखाङ्कितपदानां वर्तमाने स्वरूपं पश्यामः ।।</u>**

| | |
|---|---|
| गमिष्यति। | गच्छति। |
| भविष्यति | भवति। |
| करिष्यामि | करोमि। |
| लप्स्ये | लभे। |

**क्रियपदनिर्माणम्।**

भविष्यत् काले वर्तमानकालवत् एव प्रत्ययाः। धातोः प्रत्ययस्य मध्ये स्य योज्यते।

- केचन धातवः सेट् भवन्ति। तत्र स्य विकरणात् इ योज्यते। यथा गम् + इ+स्य +ति। इ कारात् परं स् अक्षरं ष् अक्षररूप परिवर्तनं भवति तस्माद् गमिष्यति इति रूपं भवति।
- केचन धातवः अनिट् भवन्ति। तत्र स्य विकरणात् पूर्वं इ न योज्यते। यथा लाभ् +स्य+ते =लप्स्यते।

| *लृट् लकारः भविष्यत् second future tense.* | | | |
|---|---|---|---|
| ***पुरुषः*** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| ***प्रथमपुरुषः*** | **स्यति** | **स्यतः** | **स्यन्ति।** |
| ***मध्यमपुरुषः*** | **स्यसि** | **स्यथः** | **स्यथ।** |
| ***उत्तमपुरुषः*** | **स्यामि** | **स्यावः** | **स्यामः।** |

# भविष्यति लृट्

भविष्यति भविष्यतः भविष्यन्ति।
भविष्यसि भविष्यथः भविष्यथ।
भविष्यामि भविष्यावः भविष्यामः।

अर्चिष्यति अर्चिष्यतः अर्चिष्यन्ति।
अर्चिष्यसि अर्चिष्यथः अर्चिष्यथ।
अर्चिष्यामि अर्चिष्यावः अर्चिष्यामः।

श्रोष्यति श्रोष्यतःश्रोष्यन्ति।
श्रोष्यसि श्रोष्यथःश्रोष्यथ।
श्रोष्यामि श्रोष्यावः श्रोष्यामः।

गमिष्यति गमिष्यतः गमिष्यन्ति।
गमिष्यसि गमिष्यथः गमिष्यथ।
गमिष्यामि गमिष्यावः गमिष्यामः।

कथयिष्यति कथयिष्यतः कथयिष्यन्ति।
कथयिष्यसि कथयिष्यथः कथयिष्यथ।
कथयिष्यामि कथयिष्यावः कथयिष्यामः।

**अधः प्रदत्तानि वाक्यानि भविष्यकाले परिवर्तयत।**

1) भगिनीं प्रति पत्रलेखनम्।भगिनीं प्रति पत्रं लेखिष्यामि.........।
2) भिक्षुकेभ्यः वस्त्रदानम्।.................................................।
3) प्रातःकाले नगरसङ्कीर्तनम् करोमि।...................................।
4) चिकित्सालये वैद्यदर्शनम्।...............................................।
5) सत्सङ्गे भागं गृहणामि।...................................................।
6) मित्रस्य जन्मदिवसे तस्य गृहं प्रति गमनम्।.........................।
7) सायं काले आमलकरसपानम्।........................................।
8) रात्रौ शयनकाले ईश्वरस्मरणम्।........................................।

**||केचन धातूनाम् अभ्यासं कुर्मः||**

| **धातुः** | **प्रथम पुरुष** | **मध्यमपुरुष** | **उत्तमपुरुष** |
|---|---|---|---|
| पा | पास्यति | पास्यसि | पास्यामि। |
| दृश् | पश्यति | पश्यसि | पश्यामि। |
| **श्रु** | **श्रोष्यति** | .......... | ................। |
| **प्रच्छ** | ............ | ........... | **पृच्छामि।** |
| **लिख्** | ............... | ......... | ..................। |
| **त्यज्** | ............. | .................. | ..................। |
| **स्मृ** | ................ | ................ | ..................। |

**|| केचन धातूनाम् अभ्यासं कुर्मः||**

| **धातुः** | **प्रथम पुरुष** | **मध्यमपुरुष** | **उत्तमपुरुष।** |
|---|---|---|---|
| 1) गम् | गमिष्यामि | गमिष्यावः | गमिष्यावः। |
| 2) दा | दास्यामि | दास्यावः | दास्यामः। |

| | | | | |
|---|---|---|---|---|
| 3) | उत्+स्था | उत्थास्यामि | .............. | ..................। |
| 4) | क्रीड् | क्रीडिष्यामि | ................ | ..................। |
| 5) | पठ् | पठिष्यामि | ................. | ..................। |
| 6) | कृ | करिष्यामि | ................ | ...................। |
| 7) | पा | पिबति | अपिबत् | पास्यति। |
| 8) | दा | दास्याति | .......... | ................। |
| 9) | स्म | स्मरसि | .......... | ................। |
| 10) | लिख् | लिखामि | .......... | ................। |
| 11) | गम् | गच्छामः | .......... | ................। |
| 12) | नय | आनयथः | .......... | ................। |
| **13)** | वस | वासवः | .......... | ................। |

## ।।सागरतीरविहारी।।

श्वः रविवासरः । सायम् अहं सागरतीरं गमिष्यामि। तत्र गोपालः मां प्रतीक्षिष्यते। सायङ्काले सागरशोभा नितरां **वर्धिष्यते।** बहवः जनाः तत्र **वर्तिष्यन्ते। सर्वेऽपि सागरसौन्दर्यम् आस्वदिष्यन्ते।** आकाशे चन्द्रः **प्रकाशिष्यते** नक्षत्राणि **द्योतिष्यन्ते ।** तदा सूर्यः सागरे **गाहिष्यते**। सः रक्तवर्णेन शोभिष्यते। सः पक्वं फलम् इव भासिष्यते । आवां तं सानन्दं **लोकिष्यावहे।** सर्वे जनाः अपि **लोकिष्यन्ते।** क्रीडारताः बालाः तत्र **वर्तिष्यन्ते।** तेषां चेष्टाः **वीक्षिष्यावहे।** तैः साकं भृशं **मोदिष्यावहे।** रात्रिं यावत् तत्रैव **रंस्यावहे।**"

**लृट् लकारः आत्मने पदी**

| | | | |
|---|---|---|---|
| प्र पु | स्यते | स्येते | स्यन्ते |
| म पु | स्यसे | स्यसे | स्यध्वे |
| उ पु | स्ये | स्यावहे | स्यामहे |

### ।।आत्मनेपदिनः धातवः।।

| **लट्** | **लृट्** | **लट्** | **लृट्** |
|---|---|---|---|
| वर्धते | वर्धिष्यते | द्योतते | द्योतिष्यते |
| वर्तते | वर्तिष्यते | भासते | भासिष्यते |
| शोभते | शोभिष्यते | ईक्षते | ईक्षिष्यते |
| लोकते | लोकिष्यते | स्वदते | स्वदिष्यते |
| मोदते | मोदिष्यते | कम्पते | कम्पिष्यते |

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | वन्दिष्यते | वन्दिष्येते | वन्दिष्यन्ते |
| मध्यमपुरुषः | वन्दिष्यसे | वन्दिष्येथे | वन्दिष्यध्वे |
| उत्तमपुरुषः | वन्दिष्ये | वन्दिष्यावहे | वन्दिष्यामहे |

| | | |
|---|---|---|
| राजीवः देवं वन्दिष्यते। | प्रदीपः नरेशः च देवं वन्दिष्येते। | सर्वे देवं वन्दिष्यन्ते। |
| त्वं देवं वन्दिष्यसे। | युवां देवं वन्दिष्येथे। | यूयं देवं वन्दिष्यध्वे। |
| अहं देवं वन्दिष्ये। | आवां देवं वन्दिष्यावहे। | वयं देवं वन्दिष्यामहे |

### ।।विशिष्टानि रूपाणि।।

रम् –रमते-रंस्यते।		उत् +पद् उत्पद्यते  उत्पत्स्यते।
मन-मन्यते-मंस्यते

शेङ्- शेते- शायिष्यन्ते		प्र+ष्ठा प्रतिष्ठते प्रस्थास्यते		क्रीञ्
–क्रीणीते- क्रेष्यते

कृञ् -कुरुते –करिष्यन्ते

# 1.8 || लृङ् लकारः||

**गोपालः –** भगिनि! चायं शीतलम् अस्ति।
**अञ्जना-** भवान् विलम्बं कृतवान् | भवान् यदि स्नानं शीघ्रम् अकरिष्यत् तर्हि चायं शीतलं न **अभविष्यत्।**
**गोपालः** किन्तु अहं फेनकेमेव विलम्बेन प्राप्तवान्। भवती फेनकं योग्ये स्थले अस्थापयिष्यत् चेत् मम विलम्बः न अभविष्यत्।
**अञ्जना** – अस्तु अहं पुनः उष्णं करोमि। प्रतीक्षां करोतु। चायं पीत्वा अध्ययनं करोतु।
**गोपालः**- अवश्यं खलु। गतवर्षे अहं यदि सम्यक् अध्ययनम् अकरिष्यं तर्हि उत्तीर्णः **अभविष्यम्।**
**अञ्जना** – भवान् परीक्षाकाले एव रुग्णः अभवत्। भवान् यदि स्वस्थः **अभविष्यत्** तर्हि लेखितुं कष्टं न **अभविष्यत्।**
**गोपालः**- अस्मिन् वर्षे भवती अपि साहाय्यं करोतु।
अञ्जना अवश्यं करिष्यामि। किन्तु भवान् अपि उत्साही भवतु। यथा अर्जुनः।
**गोपालः** – एवम् कथम्?
**अञ्जना-** अर्जुनः निरुत्साहतया यदि युद्धं न अकरिष्यत् तर्हि कर्तव्यलोपः **अभविष्यत्।**
**गोपालः** ज्ञातम्। हनुमान् अपि तादृशः एव उत्साही खलु ? सः यदि सागरं न अतरिष्यत् तर्हि सीतां कथम् **अद्रक्ष्यत्?**
**अञ्जना-**एवमेव अस्ति। भवतः चायम् उष्णम् अभवत्। मया पाकः करणीयम्। मिलामि तावत्।

भवति

अभवत् भविष्यति।

अभविष्यत्

अभविष्यत् अभविष्यताम् अभविष्यन् ।
अभविष्यः अभविष्यतम् अभविष्यत ।
अभविष्यम् अभविष्याव अभविष्याम।

**भक्ष् (खाना) धातु, लृङ् लकार**

अभक्षयिष्यत् अभक्षयिष्यताम् अभक्षयिष्यन्।
अभक्षयिष्यः अभक्षयिष्यतम् अभक्षयिष्यत।
अभक्षयिष्यम् अभक्षयिष्याव अभक्षयिष्याम।

पा (पीना) धातु, लृङ् लकार

अपास्यत् अपास्यताम् अपास्यन्।
अपास्यः अपास्यतम् अपास्यत।
अपास्यम् अपास्याव अपास्याम।

| ***लृङ् लकारः हेतुहेतुमद्भूत conditional tense*** | | | |
|---|---|---|---|
| ***पुरुषः*** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| ***प्रथमपुरुषः*** | **स्यत्** | **स्यताम्** | **स्यन्** |
| ***मध्यमपुरुषः*** | **स्यस्** | **स्यतम्** | **स्यत** |
| ***उत्तमपुरुषः*** | **स्यम** | **स्याव** | **स्याम** |

| **उपसर्गसहितक्रियाः** | **लङ्-रूपाणि** | | **लृङ्-रूपाणि** |
|---|---|---|---|
| अपगच्छति | प+अगच्छत् | अपागच्छत् | अपागामिष्यत्। |
| परिहरति | परि+अहरत् | पर्यहरत् | पर्यहरिष्यत् |

| | | | |
|---|---|---|---|
| आनयति | आ+अनयत् | आनयत् | आनेष्यत् |
| गच्छति | .................... | .................... | .................... |
| प्रतिवदति | .................... | .................... | .................... |
| अनुकरोति | .................... | .................... | .................... |
| प्रविशति | .................... | .................... | .................... |
| उत्तिष्ठति | .................... | .................... | .................... |

⇒ स्वीकरोति स्व्यकरिष्यत्। स्वी + अकरिष्यत् ।

⇒ अङ्गीकरोति अङ्ग्यकरिष्यत् । अङ्गी +अकरिष्यत्।

**वाक्याभ्यास :**

- यदि असौ क्षीरम् अपास्यत् तर्हि स्थूलः अभविष्यत्।(यदि वह दूध पीता तो मोटा हो जाता।)
- यदि त्वं घृतम् अभक्षयिष्यः तर्हि बलवान् अभविष्यः ।(यदि तुम घी खाते तो बलवान् होते ।)
- गृहे आज्यम् अभविष्यत् चेत् तर्हि अभक्षयिष्यम्।(यदि घर में घी होता तो खाता।)
- यदि अमी कालशेयम् अपास्यन् तर्हि तेषां दाहः सुष्ठु अभविष्यत्।(यदि वे छाछ पीते तो उनका दाह ठीक हो जाता।)
- यदि त्वं नवनीतम् अभक्षयिष्यः तर्हि पुष्टः अभविष्यः।(यदि तुम मक्खन खाते तो पुष्ट हो जाते।)
- यूयं यदि पयः अपास्यत तर्हि दौर्बल्यं न अभविष्यत्।(तुम सब यदि दूध पीते तो दुर्बलता न होती।)
- यदि अहं लवणान्वितं तक्रम् अपास्यम् तर्हि मन्दाग्निः न अभविष्यत्।(यदि मैं लवण युक्त छाछ पीता तो मन्दाग्नि न होती।)
- यदि युवाम् अपि गोरसम् अपास्यतम् तर्हि हृदयशूलः न अभविष्यत्।(यदि तुम दोनों भी छाछ पीते तो हृदयशूल न होता।)
- यदि आवयोः गृहे धेनुः अभविष्यत् तर्हि तक्रम् अपि अभविष्यत्।(हम दोनों के घर गाय होती तो छाछ भी होता।)
- यदि आवां भवने अभविष्याव तर्हि नवोद्धृतम् अभक्षयिष्याव।(यदि हम दोनों घर में होते तो मक्खन खाते।)
- वयं तत्र अभविष्याम तर्हि पयस्यम् अभक्षयिष्याम।(हम सब वहाँ होते तो दूध से बनी वस्तुएँ खाते।)
- त्वम् अभविष्यः तर्हि त्वम् अपि अभक्षयिष्यः।(तुम होते तो तुम भी खाते।)
- यदि गृहे सर्पिः अभविष्यत् तर्हि बालाः मेधाविनः अभविष्यन्।(यदि घर में घी होता तो बच्चे बुद्धिमान् होते।)
- (हमारे देश में गोरक्षा होती तो कुपोषण न होता।) अस्माकं देशे यदि गोरक्षा अभविष्यत् तर्हि कुपोषणं न अभविष्यत्।
- शुण्ठीसैन्धवयुतं तक्रम् अपास्यः तर्हि वातरोगः न अभविष्यत्।(सोंठ और सेंधा नमक से युक्त छाछ पीते तो वात रोग न होता।)
- हिङ्गुजीरयुतं मथितम् अपास्यः तर्हि अर्शः न अभविष्यत्।(हींग और जीरा युक्त छाछ पीते तो अर्शरोग न होता।)

**।।आत्मनेपदी रूपः लृङ् लकारः।।**

| | | | |
|---|---|---|---|
| प्र पु | स्यत | स्येताम् | स्यन्त। |
| म पु | स्यथाः | स्येथाम् | स्यध्वे |
| उपु | स्ये | स्यावहि | स्यामहे |

## 1.9 ||आशीर्लिङ्लकारः||

**||भू धातु, आशीर्लिङ् ||**

भूयात् भूयास्ताम् भूयासुः
भूयाः भूयास्तम् भूयास्त
भूयासम् भूयास्व भूयास्म

| ***आशीर्लिङ् लकारः*** | | | |
|---|---|---|---|
| ***पुरुषः*** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| ***प्रथमपुरुषः*** | **यात्** | **याताम्** | **यासुः** |
| ***मध्यमपुरुषः*** | **याः** | **यास्तम्** | **यास्त** |
| ***उत्तमपुरुषः*** | **यासम्** | **यास्व** | **यास्म** |

**वाक्याभ्यासः**

- एषा आपन्नसत्त्वा वीरप्रसविनी भूयात्।(यह गर्भिणी वीर पुत्र को उत्पन्न करने वाली हो। )
- एताः सर्वाः योषिताः सुचरित्राः भूयासुः।(ये सभी स्त्रियाँ पतिव्रताएँ हों।)
- एते सुचरित्रे मुदिते भूयास्ताम्।(ये दोनों पतिव्रताएँ प्रसन्न रहें।)
- हे पतिंवरे पुत्रि ! त्वं भर्तुः प्रिया भूयाः।(हे स्वयं पति चुनने वाली पुत्री ! तू पति की प्रिय होवे।)
- युवां सत्यौ भूयास्तम् ।(तुम दोनों पतिव्रताएँ होवो ।)
- वशिष्ठः दशरथस्य राज्ञीः उवाच (वशिष्ठ ने दशरथ की रानियों से कहा )- " यूयं वीरप्रसविन्यः भूयास्त।" (तुम सब वीरप्रसविनी होओ। )अहं मधुरवक्ता भूयासम्।(मैं मधुर बोलने वाला होऊँ।)
  सावित्री ने कहा –सावित्री उवाच " अहं वर्या भूयासम्।(मैं स्वयं पति चुनने वाली होऊँ।)"
- माद्री च पृथा च ऊचतुः (माद्री और कुन्ती ने कहा)– " आवां वीरप्रसविन्यौ भूयास्व ।"(हम दोनों वीरप्रसविनी होवें।)
- वयं राष्ट्रभक्ताः भूयास्म ।(हम सब राष्ट्रभक्त हों।)
- वयं चिरञ्जीविनः भूयास्म।(हम सब चिरञ्जीवी हों।)

**श्लोक :**
**एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात्।**
**एको न गच्छेत् अध्वानं नैकः चार्थान् प्रचिन्तयेत्॥ (पञ्चतन्त्र)**

स्वादिष्ट भोजन अकेले नहीं खाना चाहिए, सोते हुए लोगों में अकेले नहीं जागना चाहिए, यात्रा में अकेले नहीं जाना चाहिए और गूढ़ विषयों पर अकेले विचार नहीं करना चाहिए। इस श्लोक में जितने भी क्रियापद हैं वे सभी विधिलिङ् लकार प्रथमपुरुष एकवचन के हैं।

**प्र पु** –सीष्ट सीयास्ताम् सीरन्

म पु सीष्ठाः सीयास्थाम् सीध्वम्

उ पु सीय सीवहि सीमहि

# 1.10 ||लिट् लकारः||

| | | | |
|---|---|---|---|
| प्र० | **बभूव** | **बभूवतुः** | **बभूवुः ।** |
| म० | बभूविथ , | बभूथ | बभूवयुः। |
| उ | बभूव | बभूव | बभूविम। |

**सत्यवाक्यस्य अपह्नवे (निमीलनेच्छायाम्) लिट् लकारस्य प्रयोग: भवति । यथा –**

1) अपि कलिंगेषु अवस: ? नाहं कलिंगान् जगाम ।
2) अरे ! किमिति मे पुस्तकं मलिनीकृतवान् असि ? नाहं ददर्श ते पुस्तकम् ।
3) उत्तमपुरुषे लिट् लकार: नैव भवति, किन्तु स्वप्नावस्थायां उन्मत्तावस्थायां च उत्तमपुरुषे अपि लिट् लकारस्य प्रयोग: भवति । यथा -अहम् उन्मत्त: सन् वनं विचचार ।
4) अप्यहं निद्रित: सन् विललाप ?

**पठ् धातोः लिट् लकारे रूपाणि (परस्मैपदम्)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पपाठ | पेठतुः | पेठुः |
| मध्यमपुरुषः | पेठिथ | पेठथुः | पेठ |
| उत्तमपुरुषः | पपाठ | पेठिव | पेठिम |

**लिट् लकारः(परस्मैपदम्)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अ | अतुः | उः |
| मध्यमपुरुषः | इथ | अथुः | अ |
| उत्तमपुरुषः | अ | इव | इम |

**भाष् धातोः लिट् लकारे रूपाणि (आत्मनेपदम्)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | बभाषे | बभाषते | बभाषिरे |
| मध्यमपुरुषः | बभाषषे | बभाषाथे | बभाषिध्वे |
| उत्तमपुरुषः | बभाषे | बभाषिवहे | बभाषिमहे |

**लिट् (आत्मनेपदम्) लकारस्य आख्यातप्रत्यया:(तिङ्प्रत्ययाः) (आत्मनेपदम्)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | ए | आते | इरे |
| मध्यमपुरुषः | इषे | आथे | इध्वे |
| उत्तमपुरुषः | ए | इवहे | इमहे |

## 1.11 ||लुङ् लकारः ||

**भू, लुङ् लकारः।**

अभूत् / अभूताम् /अभूवन्।
अभूः / अभूतम् / अभूत।
अभूवम् / अभूव / अभूम।

| *लुङ् लकारः Perfect Tense* | | | |
|---|---|---|---|
| ***पुरुषः*** | **एकवचनम्** | **द्विवचनम्** | **बहूवचनम्** |
| ***प्रथमपुरुषः*** | सीत् | सीष्टाम् | सीषुः |
| ***मध्यमपुरुषः*** | सीः | सिष्टम् | सीष्ट |
| ***उत्तमपुरुषः*** | सिष्म् | सिष्व | सिष्म |

वाक्याभ्यासः

1. तव गृहे सन्तानः अभूत्।(तुम्हारे घर सन्तान हुई। )
2. महान् उत्सवः अभूत्।(महान् उत्सव हुआ। )
3. तव माता च पिता च आनन्दितौ अभूताम्।( तुम्हारे माता और पिता आनन्दित हुए। )
4. सर्वे आनन्दमग्नाः अभूवन्। (सभी आनन्दमग्न हो गए।)
5. त्वम् अपि प्रसन्नः अभूः।(तुम भी प्रसन्न हुए।)
6. युवां भूरि आनन्दितौ अभूतम्।(तुम दोनों बहुत आनन्दित हुए।)
7. यूयं श्रान्ताः अभूत ।(तुम सब थकित हो गये थे।)
8. अहम् अपि श्रान्तः अभूवम्।(मैं भी थकित हो गया था।)
9. आवाम् उत्सवेन हर्षितौ अभूव।(हम दोनों उत्सव से हर्षित हुए।)
10. वयम् आनन्दिताः अभूम।(हम सब आनन्दित हुए।)

**आत्मनेपदि रूपाणि**

**प्र पु** सत साताम् सन्त

**म पु** सथाः साथाम् सध्वम्

**उ पु** सि सावहि सामहि

# ||द्वितीयः पाठः||

## 2. 1 उद्धेश्यानां ज्ञानम्-

- सर्वेषां विभक्तीनाम् प्रयोगे सक्षमः भविष्यति।
- त्रिषु लिङ्गेषु लेखनकौशलम् लप्स्यति
- कठिणपदानाम् अभ्यासः। त्रिषु लिङ्गेषु।करिष्यति।

निर्देशे प्रथमा प्रोक्ता सैव चामन्त्रणेष्वपि । द्वितीया कर्मणि प्रोक्ता तृतीया कतृ करणयोः ॥
कर्तरि ज्ञानज्ञाप्येऽङ्गविकारे हेतावपि च इष्यते ।
तदर्थ्ये सम्प्रदाने च चतुर्थी स्याच्च सर्वदा हेत्वापादानयोः पञ्च षष्ठी तु कर्तृकर्मसम्बन्धे ।
अधिकरणनिमित्तसत्त्वे सप्तमी स्याच्च विषयेऽपि।
यदा कर्तरि प्रथमा स्यात् कर्मणि द्वितीया तदा ।
यदा कर्तरि तृतीया स्यात् कर्मणि प्रथमा सदा।।
विशेषणं पुरस्कृत्य विशेष्यं तदनन्तरम् ।

कर्तृककर्मक्रियायुक्तमेतदन्वलक्षणम्।।

## 2.2 ||द्वितीया विभक्तिः||

i. वाक्ये क्रियासूचकं पदम् क्रियापदम् , कर्तृसूचकं पदं कर्तृपदम् , यत् कर्म सूचयति तत् कर्मपदम् कर्मपदस्य द्वितीयाविभक्तिः भवति। आवरणे स्थितानां शब्दानां उचितरूपाणि रिक्तस्थले लिखन्तु।

(उदा सः प्रतिदिनं ................(<u>भगवद्गीता)</u> पठति। सः प्रतिदिनं <u>भगवद्गीतां</u> पठति।)

1. रमेशः प्रतिदिनं प्रातः काले उत्थाय ……...........(सन्ध्यावन्दनम्) करोति।
2. ..................(देवः) ......अग्रजः .........(जनकः) ..............(आचार्यः)च नमस्करोति।
3. सीता .................(ग्नन्थः) .......(सुधाखण्डः)........... स्यूतः .........(दण्डः) च नयति।
4. भगिनी आपणतः..............(माला)............ (पत्रिका ).........(पदरक्षा) ............(स्थालिका) आनीतवती।
5. बालकः ........................(लेखनीं ) ...............(अङ्कनीं)............(कादम्बरी) ...........(सूची) च क्रीतवान्।
6. माता...........(स्यूत)...........(युतकम्) ................(वेष्टी)..............( शाटिका).............च क्षालितवती।
7. अहम् ..............(.कोलाहलम्) .............(कलहम्).............(चर्चा)..............(आलस्यं) च न इच्छामि।
8. अहं..........(गणेशः) ............(दुर्गा) ....................(सरस्वतीं).........................(लक्ष्मीं) च पूजयामि।

**अभ्यासः**

1. रामः पाठं <u>पठित्वा</u> निद्रां करोति।
2. बालकः हस्तं <u>प्रक्षाल्य</u> भोजनं करोति।
3. छात्रः पाठं <u>पठितुम्</u> विद्यालयं गच्छति।
4. बालिका पाठं <u>पठन्ती</u> एव निद्रां कृतवती।

एतेषु वाक्येषु चतुरस्र चिह्नेन क्रमशः क्त्वान्त ल्यबन्तं तुमन् अन्त शत्रन्तं च पदं सूचितम् । तेभ्यः पूर्वम् स्थितानि कर्मपदानि अधोरेखया सूचितानि। तेषाम् अपि द्वितीया भवति इत्येतम् अंशं परिशीलयन्तु।

**II. अभ्यासः आवरणे सूचितानां शब्दानाम् उचितरूपाणि रिक्तस्थाने लिखन्तु।**

- भवती ......................(विषयः) ज्ञात्वा अग्रे पठतु।
- छात्राः .....................(प्रश्नः) पृष्ट्वा विषयं जानन्ति।
- बालिकाः ..................(लेखनी) पातयित्वा रोदनं कृतवती।
- ते ............................(पत्रिका) पठित्वा विषयं जानन्ति।
- माता.........................(पाकं) समाप्य सखी गृहम् गतवती।
- सदा सज्जनानां.............(व्यवहारः) अनुसृत्य गच्छतु।
- सा........................... (देवी) नसस्कृत्य विद्यालयं गच्छति।
- भगिनीं .....................(शाटिका) प्रक्षाल्य आतपे प्रसारितवती।
- ...............................(अभ्यासः) कर्तुम् मम समयः नास्ति।
- ...............................(भक्तः) अनुग्रहीतुम् भूलोकम् आगतवान्।

## III. अधः स्थितानि वाक्यानि पठन्तु।

सः पाठं पठति। सः पाठं पठितवान्। सः पाठं पठिष्यति।
सः पाठं पठतु। सः पाठं पठित्वा गृहं गतवान्। सः पाठं पठितुम् पुस्तकं स्वीकृतवान्।
सः पाठं विलिख्य गृहं गतवान्। सः पाठं पठन् निद्रां कृतवान्।

**वसुदेवसुतं देवं कंसचाणूरमर्दनम् । देवकीपरमानंद कृष्णं वन्दे जगद्गुरुम् ।।**
**रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम् । शयने यः स्मरेन्नित्यं दुःस्वप्नं तस्य नश्यति ।**
**अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम्।**

**iii. उपर्युक्तवाक्यानाम् आधारेण अधः सूचते सन्दर्भद्वये प्रथमवाक्यं दृष्ट्वा अवशिष्टानि सप्तवाक्यानि लिखन्तु।**

**रविः श्लोकं लिखति। रविः......................। ................................।**

**......................। ...........................। ..................................।**

**......................। ............................। ..................................।**

**बालकः लेखनीं क्रीणाति। बालकः...................। ................................।**

**..........................। .............................। ................................।**

**..........................। ............................। ................................।**

**iv. अधः एकं सम्भाषणं पठतु। आवरणे विद्यामानां शब्दानाम् उचितरूपाणि रिक्तस्थाने पूरयतु।**

**माला -** ह्यः अहम् ..............................(ग्रामः) आसम्।
गीता - ..........................................(ग्रामः) गतवती?
माला - प्रतिवर्षम् मम पितामहः.............(देवीपूजा) करोति। अथः अहं .................(ग्रामः)गतवती।
गीता - ग्रामे किं किम् कृतववती?
माला - ग्रामे ....................................(लीला)..............................................(लता) च दृष्टवती। पितामहेन सह .....................(वार्तालापः) कृतवती। ...............(बीजपूरवृक्षः) आरुह्य...............(फलानि ) खादितवती। अस्तु ह्यः अध्यपकः ..............(कः)...............(पाठः) पठितवान्?
गीता - ह्यः अध्यपकः.................(पाठः )न पाठितवान्। अपि तु .........................(श्लोकाः) पाठितवान्।
माला - तृतीयपाठस्य विषये......................(प्रश्नः) पृष्टवान् वा?
गीता - अहम् सः...............................(प्रश्नाः) पृष्टवान्। वयं ....................(उत्तराणि) उक्तवन्तः।
माला - ह्यः (गयत्री)......................(कक्षा) आगतवती वा?
गीता - अहम् सा .................(नूतनः) ..........(चोलः)...............(निचोलः) च दृत्वा आगतवती। ह्यः तस्य जन्मदिनम्। अतः सा सर्वेभ्यः ...............(चाकलेहः) दत्तवती।
सा......................अध्यापकाः नमस्कृतवती। अध्यपकाः ,............................(आशीर्वदः) कृतवन्तः। वयं .......................(अभिनन्दनवचनानि) उक्तवन्तः।

## V. कोष्ठके सूचितानाम् शब्दानाम् आधारेण वाक्यानि लिखन्तु।

| | | |
|---|---|---|
| देवलायः | परितः | प्राकारः |
| शाला | | क्रीडाङ्गणम् |
| शर्करा | | पिपीलिका |

| | | |
|---|---|---|
| चन्द्रः | | मेघाः |
| वेदिका | | प्रेक्षकाः |
| सा | | सख्यः |
| अध्यापकः | | बालकाः |
| अध्यापिकाः | | बालिकाः |
| दीपा | | कीटाः |
| पुष्पाणि | | भ्रमराः |
| वृक्षः | | छाया |
| व्यजनम् | | वायुः |
| आपणम् | | जनाः |

1. देवालयम् परितः प्राकारः अस्ति।
2. ................................................।
3. ................................................।
4. ................................................।
5. ................................................।
6. ................................................।
7. ................................................।
8. ................................................।
9. ................................................।
10. ................................................।
11. ................................................।
12. ................................................।

रामः फलं खादति। इत्यत्र फलम् इति कर्मपदम्। एतस्मिन् वाक्ये एकं कर्म अस्ति।

रामः अध्यापकं प्रश्नं पृच्छति। इति एकस्मिन् वाक्ये अध्यापकम् इति प्रश्नम् इति च कर्मपदम्। एवम् अत्र कर्मपदद्वयम् अस्ति। अतः एतत् द्विकर्मकम् वाक्यम्। संस्कृते व्यावहारिकतया 4 धातवः (एतदर्थकाः  अन्ये धातवः च) द्विकर्मकाः इति प्रसिद्धाः ते च वदति पृच्छति। प्रार्थयति नयति।

## vi. अधोलिखित वाक्ये रिक्तस्थानानां कर्मपदेन पूरयतु।

1) पाथिकः ..............................(आपणिकः)..........................(मार्गः)पृच्छति।
2) भिक्षुकः ...............................(गृहिणी) ............................(अन्नम्)प्रार्थयति।
3) कर्मकरः...............................(सम्मार्जनी)...........................(प्रकोष्ठः) नयति।
4) बालिका...............................(विद्यालयः) ..........................(लेखनी) नयति।
5) आचार्यः..............................(छात्राः) ...............................(गीता) बोधयति।
6) पितामही...........................(पौत्राः) ..............................(कथा) कथयति।
7) प्रजाः...............................(महाराजा) ..........................(क्लेशाः) निवेदयन्ति।
8) अपराधी...........................(आरक्षकः) ..........................(क्षमा) प्रार्थयति।
9) अध्यापकः.........................(छात्राः) ..............................(प्रश्नः) पृच्छति।
10) सः..................................(वयम्) ..............................(मन्त्रः) उपदिशति।

vii. बालकः कं कान् जानाति, कं कान् न जानाति इति अधः चित्रेण निर्दिष्टम् अस्ति। तदाधारेण वाक्यानि रचयन्तु।

| | | |
|---|---|---|
| बालकः | जानाति | न जानाति |
| | सः | एषः |
| | एषा | सा |
| | भवान् | अहम् |
| | भवती | तत् |
| | ते | ताः |
| | एताः | एते |
| | भवन्तः | तानि |
| | भवत्यः | वयम् |

उदा- बालकः तं जानाति । एतं न जानाति।

1) बालकः..............................जानाति। ..........................................न जानाति।
2) बालकः..............................जानाति। ..........................................न जानाति।
3) बालकः..............................जानाति। ..........................................न जानाति।
4) बालकः..............................जानाति। ..........................................न जानाति।
5) बालकः..............................जानाति। ..........................................न जानाति।
6) बालकः..............................जानाति। ..........................................न जानाति।
7) बालकः..............................जानाति। ..........................................न जानाति।
8) बालकः..............................जानाति। ..........................................न जानाति।
9) बालकः..............................जानाति। ..........................................न जानाति।
10)बालकः..............................जानाति। ..........................................न जानाति।
11)

**द्वितीया विभक्तिः।**

⇒ कर्तरि प्रयोगे कर्मणः द्वितीया विभक्तिः भवति।

⇒ सकर्मकधातूनां प्रयोगे कर्तरी कर्मणि च प्रयोगे क्त्वान्तात्।

⇒ ल्यबन्तात् च पूर्वं द्वितीया विभक्तिः भवति।

⇒ सकर्मकधातूनां प्रयोगे (कर्तरी कर्मणि )द्वितीयविभक्तिः भवति।

⇒ तुमन्नन्तात् शतृन्तात् च पूर्वं द्वितीयाविभक्तिः भवति।

⇒ परितः शब्दात् पूर्वं द्वितीया विभक्तिः भवति

⇒ विना प्रयोगे द्वितीया विभक्तिः भवति।

⇒ उभयतः प्रयोगे द्वितीयाविभक्तिः भवति।

⇒ द्विकर्मकधातूनां प्रयोगे कर्मणोः द्वितीया विभक्तिः भवति।

## 2 .2 ।।तृतीया विभक्तिः।।

क्रियायां यत् साधनं भवति तस्य तृतीयाविभक्तिः भवति।

i. उदा सः दण्डेन शुनकं ताडयति।

1) एतैः साधनैः भवन्तः किं कर्तुम् शक्नुवन्ति लिखन्तु।
2) उदा- (करवस्त्रम्) अहं ...............करवस्त्रेण मुखं मार्जयामि।
3) (कर्तरी).................................अहं पत्रं कर्तयामि।
4) कुञ्चिका-................................अहं तालम् उद्घाटयामि।
5) उट्टङ्कनयन्त्रम्-.........................अहम् उट्टङ्कनं ..................।
6) सीवनयन्त्रम्-...........................अहं सीवनं .......................।
7) विमानम्-................................अहं सञ्चारं.........................।
8) सूक्ष्मदर्शकम्-..........................अहं सूक्ष्मवस्तूनि.................।
9) कङ्कतिका-..............................अहं केशप्रसाधनं.................।
10)लोकयानम्-.............................अहं प्रयाणं .......................।
11)दूरवाणी -...............................अहं सम्भाषणम्.................।
12)द्विचक्रिका-.............................अहं विद्यालयं.....................।
13)लेखनी -................................अहं पत्रं ..........................।
14)दन्तकूर्चः-..............................अहं दन्तं..........................।
15)सञ्चिका -................................अहं वस्तूनि......................।
16)तुला -....................................अहं तोलयामि।
17)सङ्गणकयन्त्रम्-............................अहं सङ्गणकयन्त्रेण..............।
18)लेखनी-..................................अहं चित्रं............................।
19)मार्जनी-..................................अहं मार्जन्या.......................।

**।। विभक्तिश्लोकाः।।**

गन्धेन हीनं सुमनो न शोभते दन्तैर्विहीनं वदनं न भाति ।
सत्येन हीनं वचनं न दीप्यते पुण्येन हीन: पुरुषो जघन्यः।।
दम्भेन धर्मं कपटेन मैत्रीं सुखेन विद्यां परुषेण नारीम् ।
परोपतापेन समृद्धभावं वाञ्छन्ति ये व्यक्तमपण्डितास्ते ।।
विना शीलेन वनिता वाग्मिता विद्यया विना । विनियोगैर्विना वित्तं मास्तु कस्यापि जीवनः ॥
पञ्चभिः सह गन्तव्यं स्थातव्यं पञ्चभिः सह | पञ्चभिः सह वक्तव्यं न दुःखं पञ्चभिः सह |

### ii. भावसूचकाना शब्दानाम् अपि तृतीया भवति।

उदा –विद्यार्थीः सन्तेषेण विद्यालयं गतवान्।

वाक्यस्य अन्ते दत्तस्य शब्दस्य तृतीयविभक्त्यन्तरूपेण रिक्तस्थानानि पूरयन्तु।

यथा -सः.....................कृषिं करोति स्म। सः परिश्रमेण कृषिं करोति स्म।

1. माता ..................................पुत्रं ताडितवती(क्रोधः)।
2. श्रमिकः...............................धनम् अर्जयति।(कष्टम्)
3. व्याघ्रं दृष्ट्वा पान्थः ..................कंपते स्म।(भयेन)
4. मरणवार्तां शृत्वा सा..................रोदनं कृतवती।(दुःखम्)
5. भवान् यत् करोति तत्..........................करोतु(सन्तोषः)
6. सः प्रशासकः सदैव............................व्यवहरति। (कोपः)
7. भो आरक्षकाः। भवन्तः .......................रक्षयन्तु।
8. मया...............................................किमपि वक्तव्यम् नास्ति।(विशेषता)
9. रमा रमेशयोः परिणयः.........................प्रवृत्तः।(वैभवम्)
10. कष्टाधिक्ये भवतु भवान् .......................कार्यं करोतु।

11. एतां वार्तां शृत्वा सा ............................निश्वसितवती।(तृप्तिः)
12. अध्यापकस्य तर्जनं शृत्वा सा ................शिरः अवनमय्य स्थितवती।(लज्जा)
13. कः सः ? इति गोविन्दः .......................रामम् अपृच्छत्।(कुतूहलम्।)
14. क्रीडायां पराजितः ..............................प्रतिगतवान्।(निराशा)

**iii. सह शब्दयोगे तृतीया विभक्तिः भवति। (उदा पिता पुत्रेण सह नगरं गच्छति।)** वाक्यरचनायां साहाय्यकानां त्रयाणां शब्दानाम् आधारेण वाक्यानि रचयन्तु।
उदा- लक्ष्मणः-रामः-वनम् गतवान्।
लक्ष्म्णः रामेण सह वनम् गतवान्।

1. रविः-मित्रम्-वनम् ।
2. गोपालम्-सिवः-सम्भाषणम् कृतवान्।
3. गोविन्दः-भवती-चर्चाम् अकरोत्।
4. माता- पत्री –बन्धुगृहम् अगच्छत्।
5. सः भगिनी- कलहः करोति।
6. कः भवान् अगतवान् ।
7. राजा सैनिक- युद्धार्थम् गच्छति।
8. पिता पुत्रम् कार्यं करोति।
9. ज्येष्ठः कनिष्ठः विद्यालयं गच्छति।
10. रामः कृष्णः क्रीडति।

## Iv. विना शब्दस्य योगे तृतीयाविभक्तिः भवति।

**उदा- धनेन विना कोपि न जीवति।** विना शब्दस्य योगे द्वितीया विभक्तिः, पञ्चमी विभक्तिः चापि भवति। कैः विना कः किम् कर्तुम् न शक्नोति किं न करोति इति लिखन्तु।

यथा लेखनी- लेखन्या विना हरिः लेखितुं न शक्नोति।
1) हस्तः - .....................भोजनं कर्तुम् न शक्नोति।
2) जलम् - .....................जीवनं नास्ति।
3) वायुः - .....................जीवनं नास्ति।
4) प्रकाशः- .....................जीवनं नास्ति।
5) उपनेत्रम् .....................पठनं न भवति।
6) लवणम् .....................भोजनम् स्वाधुः न भवति।
7) पादरक्षा .....................चलनम् नास्ति।
8) आत्मविश्वासः..................कार्यसाफलम् न भवति।
9) द्विचक्रिकया.....................सञ्चारः नभवति।
10) कार्यानम् ........................सञ्चारः नभवति।
11) दन्तकूर्चः........................दन्तदावनम् न भवति।
12) विद्या ........................जीवनं कष्टकरः।

**v. यः शब्दः करण वाचकः होतुवाचकः भवति स तृतीया।**
उदा मम आगमनेन सः सन्तुष्टः।

| | |
|---|---|
| 1. एषा वार्ता | कोपः प्रवृद्धः |

| | |
|---|---|
| 2. एतादृशं चिन्तनम् | मनः कलुषितम् |
| 3. अविवेकः | महती विपत् |
| 4. धावनम् | मार्गे पतितः |
| 5. दैवानुग्रहः | अपायः न जातः |
| 6. कथनम् | न किमपि प्रयोजनम् |
| 7. आगमनम् | सर्वे तूष्णीं स्थितवन्तः |
| 8. अनारोग्यम् | कृशः |
| 9. शिरोवेदनम् | कार्यलायं न गतवन्तः |
| 10. अग्निस्पर्शः | हस्तः दग्धः |

1. एतया वर्तया तस्य कोपः प्रवृद्धः।
2. ……………………………………………………………।
3. ……………………………………………………………।
4. ……………………………………………………………।
5. ……………………………………………………………।
6. ……………………………………………………………।
7. ……………………………………………………………।
8. ……………………………………………………………।
9. ……………………………………………………………।
10. ……………………………………………………………।

**vi. प्रयाणसमये यत् वाहनम् उपयुज्यते तत् प्रयाणसाधनम्। तत्र तृतीयाविभक्तिः भवति।**

उदा- सः <u>द्विचक्रिकया</u> विद्यालयं गच्छति।

अभ्यासः- अधः सूचितानां त्रयाणां सूच्यशब्दानां साहाय्येन वाक्यानि रचयन्तु।

यथा- रामः कार् यानम् –मैसूरनगरम्- गच्छति। रामः कार् यानेन मैसूरनगरं गच्छति।

1. सीता- त्रिचक्रिकया-गृहं गच्छति।
   ……………………………………………………………।
2. चिन्मयः बैक्-यानं- कार्यालयः
   गच्छति।…………………………………………………।
3. जनाः लोकयानं गृहम् गच्छन्ति।….
   ……………………………………………………………।
4. वयम् धूमशकटः ग्रामः गच्छामः।…………………………………………………।
5. यात्रिकः विमानं विदेशः उड्डयति।…………………………………………………।
6. आरक्षकः कार्-यानम् कोलहलस्थलम्
   प्राप्नोति।……………………………………।

vii. यदा वयं किमपि क्रीणीमः तदा यत् धनं दीयते तस्य तृतीया विभक्तिः भवति।

उदा - अहं दशरूप्यकैः पुस्तकं क्रीतवान्। अहम् 500 रूप्यकैः स्यूतः क्रीतवान्।

1) 250rs शाटिका । …………………………………………।
2) 300rs युतकम्। …………………………………………।
3) 500rs ऊरुकम्। …………………………………………।

4) 300rs पादरक्षा।...................................................।

VIII. **निषेदार्थकः अलं शब्दः यत्र प्रयुज्यते तत्र तृतीया विभक्तिः भवति। पर्याप्तम् इति अर्थे अलं योगे चतुर्थी भवति।**

उदा – बालाः तूष्णीं तिष्ठन्तु। अलं कोलाहलेन।

**अभ्यासः। आवरणान्तर्गतेन शब्देन अलं शब्दं योजयित्वा वाक्यानि रचयन्तु।**

यथा- (जल्पनम्).......................अयि भगिन्यः अलम् जल्पनेन।

1. (अतिविस्तरः)..............................................................।
2. (शोकः) .....................................................................।
3. (साहसम्) ..................................................................।
4. (अविवेकिता) ...............................................................।
5. (धावनम्) ....................................................................।

**Ix आवरणे दत्तानां शब्दानाम् उचितैः रूपैः रिक्तानि स्थालानि पूरयन्तु।**

1. पाचकः……………………………...(छुरिका) शाकं कर्तयति।
2. अर्जुनः……………………………..(बाणाः) कौरवान् मारितवान्।
3. महिला……………………………..(सम्मार्जनी) मार्जितवती
4. चित्रकारः…………………(अङ्कन्यः)..........(कूर्चाः) चित्रं लिखति।
5. भवती……………………………...(का) सह आगतवती।
6. ह्यः भवान् -………………………...(जननी) सः कुत्र गतवान्।
7. दुष्टः- ……………………………....(सर्वे) सह कलहं करोति।
8. भवन्तः अपि…………………………(वयं) सह संस्कृतं पठतु।
9. ……………………………........(धनं)विना जीवनं कठिणम्।
10. ……………………………...(दन्ताः) विना चर्वणं न शक्यम्।
11. ……………………………..(.भक्तिः)विना पूजया कः लाभः।
12. भिक्षुकः ........................................(आशा) द्वारसमीपं गतवान्।
13. ……………………………........................(विशेषता) वक्तव्यं किमपि नास्ति।
14. ………………………….............…......(कलहः) न्यायनिर्णयः न भवति।
15. सः..........................................................(ताडनम्) शुनकस्य कोपं वर्धयति।
16. ……….………................................(अश्रुविमोचनम्) कष्टस्य निवारणं न भवति।
17. औषधस्य……………….........................(उच्चारणमात्रम्) रोगः न अपगच्छति।
18. ....……..(वेगदूतयानम्)............................(सामिसुखयानम्) वयं धर्मस्थलं गच्छामः।
19. ……………………………..................(दशदिनानि)सः अस्वस्थः अस्ति।
20. मित्रम् !अलम्………………………….....(चिन्ता)उत्तिष्ठतु।

X अधः कोष्ठके ख विभिग एकवचनम् रूपम् अस्ति। च विभागे स्थितं शुद्धं बहुवचनरूपं रेखया अङ्कयतु।

| | | | |
|---|---|---|---|
| जनेन<br>चोरेण<br>दन्तेन<br>भवता<br>भवत्या<br>भगिन्या<br>मया<br>तेन<br>सर्वेण<br>कया<br>लेखन्या | जनेभ्यः<br>चोरैः<br>दन्ताभिः<br>भवत्यैः<br>भवतीभिः<br>भगिनीभ्यः<br>मयैः<br>तैः<br>सर्वैः<br>कयाभिः<br>लेखनीभिः | जनैः<br>चोरेभ्यः<br>दन्तानि<br>भवद्भिः<br>भवताभिः<br>भगिनीभिः<br>मयाभिः<br>तद्भिः<br>सर्वेणैः<br>कैः<br>लेखनैः | जनाभिः<br>चोराणाम्<br>दन्तैः<br>भवताभिः<br>भवत्यैः<br>भगिन्याभिः<br>अस्माभिः<br>ताभिः<br>सर्वेभिः<br>काभिः<br>लेखन्याभिः |

कृष्णः तेन सह चर्चां कृतवान् । तैः सह वादं कृतवन्तः।

1. कृष्णः ...............सह............. ...............। (कथां पठितवान्) ...............सह.............. ...........।पाठं पठितवान्।
2. कृष्णः ...............सह............... .............। (गीतम् गीतवान्) ...............सह............ .............। पाठं पठितवान्।
3. कृष्णः ...............सह............. ...............। (अपणं गतवान्)................सह........... ..............।विपणिं गतवान्।
4. कृष्णः ...............सह............. ...........। गृहम् आगतवान् वा?..............सह............ ..............।क्रीडितुम् आगतवान् वा?
5. कृष्णः .............सह............ ................। धावितवान्। .............सह........... .............।(न उपविष्टवान्।)

**तृतीया विभक्तिः।**

⇒ करणे तृतीयाविभक्तिः भवति।

⇒ भावे प्रयोगे कर्मणि प्रयोगे।

⇒ सह प्रयोगे तृतीया विभक्तिः भवति।

⇒ सदृश प्रयोगे तृतीया विभक्तिः भवति।

⇒ करणवाचकस्य तृतीया विभक्तिः भवति।

⇒ अलम् योगे तृतीया विभक्तिः भवति।

# 2.3|| चतुर्थीविभक्तिः||

## || विभक्तिश्लोकाः||

रामाय रामभद्राय रामचन्द्राय वेधसे । रघुनाथायनाथाय सीतायाः पतये नमः||
विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतत् ज्ञानाय दानाय च रक्षणाय ॥
नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय।
नित्याय शुद्धाय दिगम्बराय तस्मै नकाराय नमः शिवाय॥१॥

i. यत्र दानक्रिया अस्ति तत्र यस्मै वयं किमपि दद्मः तस्य चतुर्थी विभक्तिः भवति|
उदा- बली वामनाय भूमिं दत्तवान्|
अभ्यासः – रामः कस्मै किं दत्तवान् इति अधस्तनकोष्टकस्य साहाय्येन लिखन्तु|

| | | | |
|---|---|---|---|
| रामः | पुत्रः<br>पुत्री<br>मित्रं<br>पत्नी<br>कर्मकरी<br>सेविका<br>भगिनी | युतकवस्त्रं<br>शाटिका<br>पुस्तकानि<br>धनं<br>वेतनम्<br>उपायनम्<br>कण्ठहारम् | दत्तवान् |

1) रामः पुत्राय युतकवस्त्रं दत्तवान्|
2) ........................................|
3) ........................................|
4) ........................................|
5) ........................................|
6) ........................................|
7) ........................................|
8) ........................................|
9) ........................................|
10) ........................................|

**अभ्यासः कोष्ठकं दृष्ट्वा वाक्यनिर्माणं कुरुत|**

| | | | |
|---|---|---|---|
| रमा | भिक्षुकाः<br>सख्यः<br>सर्वे<br>ते<br>महिलाः<br>बान्धवाः | नाणकानि<br>मधुरम्<br>पानीयम्<br>उपाहारम्<br>फलम्<br>ताम्बूलम् | दत्तवती |

1) रमा...............................भिक्षुकेभ्यः नाणकानि दत्तवती।
2) .........................................................................।
3) .........................................................................।
4) .........................................................................।
5) .........................................................................।
6) .........................................................................।

ii. रोचते इति यत्र प्रयोगः तत्र यस्मै रोचते तस्य चतुर्थीविभक्तिः भवति। यत् रोचते तस्य तु प्रथमा विभक्तिः एव।

रामाय मधुरं रोचते। अधस्तनचित्रस्य साहाय्येन किं कस्मै रोचते /न रोचते इति लिखन्तु।

1) कार्यम् .................................................।
2) कार्यम् .................................................।
3) पठनम् .................................................।
4) पठनम्..................................................।
5) लेखनम् ...............................................।
6) लेखनम् ...............................................।
7) पाकः .................................................।
8) पाकः .................................................।
9) रोटिका ................................................।
10) चित्रम् ................................................।
11) चित्रम् ................................................।
12) कलहः ................................................।
13) कलहः ................................................।
14) वादः ..................................................।
15) वादः ..................................................।

**iii. नमः शब्दस्य योगः तत्र तस्य शब्दस्य चतुर्थी भवति।**

देवाय नमः .................................................।


विशेषः नमस्करोमि। इति क्रियापदस्य प्रयोगः कृतः चेत् तु द्वितीया एव। यथा – अहं देवं नमस्करोमि।

### अभ्यासः के कस्मै नमः इति वदन्ति इति निर्दिशन्तु।

1. रामभक्ताः<u>      रामाय      </u>नमः इति वदन्ति।
2. शिवभक्ताः<u>      शिवाय      </u> नमः इति वदन्ति।
3. दुर्गभक्ताः<u>      दुर्गायै      </u>नमः इति वदन्ति।
4. आञ्जनेय भक्ताः ..................नमः इति वदन्ति।
5. कृष्णभक्ताः .......................नमः इति वदन्ति।
6. नारायणभक्ताः ...................नमः इति वदन्ति।

iv. क्रुध्यति कुप्यति असूयति ईर्ष्यति द्रुह्यति........................।

अभ्यासः अधः चत्वारः निर्दिष्टाः सन्ति। कः कं प्रति किं करोति इति बाणचिह्नेन सूचितम् अस्ति। तदाधारेण वाक्यानि रचयन्तु।



क्रुध्यति

रश्मि सौम्या

द्रुह्यति

रविः अक्षयाय असू....।

1) रविः.......................................।
2) अक्षयः....................................।
3) सौम्या.....................................।
4) रश्मिः.....................................।

**v. कल्पते धातोः योगे चतुर्थी भवति।(कल्पते इत्यर्थे भूधातोः (भवति) प्रयोगः अपि कर्तुम् शक्यः।)**

उदा -भक्तिः ज्ञानाय कल्पते /भवति।

भक्तिः ज्ञानोत्पादने समर्थः भवति इत्यर्थः।

**आवरणे दत्तस्य पदस्य उचितेन चतुर्थी विभक्त्यन्तरूपेण रिक्तानि स्थलानि पूरयन्तु।**

1) एवं कथनं तस्य.........................भवेत्।(खेदः) उदा -एवं कथनं तस्य खेदाय भवेत्।
2) एतत् कार्यम् अतीव ...........................................भवति।(कष्टम्)
3) प्रतिदिनं प्रातः उत्थानं..........................................भवति।(आरोग्यम्)
4) संस्कृतभाषा .......................................................भवति। (राष्ट्रैक्यम्)
5) चर्चा............................................................ मा भवतु।(विवादः)
6) दुर्व्यसनं कदापि ..............................................न भवति(सुखम्)
7) अद्य तस्य पाठनं ..............................................अभवत्। (शिरोवेदना)
8) गुरूणाम् उपदेशस्य श्रवणम्.................................भवति।(हितम्)
9) एषः उपायः भवतः................................भवति वा न वा?(तृप्तिः)
10) दुर्जनस्य धनसम्पादनं .............................भवति।(मदः)
11) अप्रियवचनम् कस्य वा ...........................भवेत्।(सन्तोषः)

vi. आदित्यः एतस्मै किञ्चित् दर्शयति अन्यस्मै अन्यत् दर्शयति। सः कस्मै किं दर्शयति। इति अधः निर्दिष्टम् अस्ति। तदाधारेण सर्वनामशब्दानां चतुर्थीविभक्तिं योजयन्तः वाक्यन्तः राचयन्तु।

| | |
|---|---|
| 1. सः चित्रम् | एषः पत्रिकाम् |
| 2. सा शाटिका | एषा कण्ठहारः |
| 3. भवान् ग्रामः | भवती नगरम् |
| 4. एते यक्षगानम् | ते चलनचित्रम् |
| 5. एताः नृत्यं | ताः नाटकम् |
| 6. भवन्तः विद्यालयः | भवत्यः कार्यालयः |
| 7. अहम् चित्रकथापुस्तकम् | वयम् क्रीडनकानि। |

उदा –आदित्यः तस्मै चित्रं दर्शयति। एतस्मै पत्रिकां दर्शयति।

1. आदित्यः .............. .................दर्शयति।............... .................दर्शयति।
2. आदित्यः .............. .................दर्शयति।............... .................दर्शयति।
3. आदित्यः .............. .................दर्शयति।............... .................दर्शयति।
4. आदित्यः .............. .................दर्शयति।............... .................दर्शयति।
5. आदित्यः .............. .................दर्शयति।............... .................दर्शयति।

6. आदित्यः ............... ..................दर्शयति।................ .................दर्शयति।

**चतुर्थी विभक्तिः।**

⇒ ददाति इत्यर्थे यस्म्यै ददाति तस्मै चतुर्थी विभक्तिः भवति।

⇒ रोचते प्रयोगे यस्मै रोचते तस्य चतुर्थी विभक्तिः भवति।

⇒ नमः प्रयोगे चतुर्थी विभक्तिः भवति।

⇒ क्रुध्यति असूयति द्रुह्यति ईर्ष्यति इत्येतेषां धातूनां प्रयोगे चतुर्थी विभक्तिः भवति।

# 2.4।। पञ्चमीविभक्तिः।।

**।।विभक्तिश्लोकाः।।**

मानाद्वा यदि वा लोभात् क्रोधाद्वा यदि वा भयात् ।
यो न्यायमन्यथा ब्रूते स याति नरकं नरः ॥
विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वात् धनमाप्नोति धनात् धर्मं ततः सुखम् ॥

i. विभागः यदा भवति तदा यः अवधिभूतः भवति तस्य पञ्चमीविभक्तिः भवति। उदा वृक्षात् पर्णं पतति।

पञ्चम्यर्थे ....तः इति प्रयोगः सरलः। तः तस् इत्येतत् अव्ययम्।अतः सर्वेषु लिङ्गेषु तस्य समानं रूपम्।
गोविन्दस्य गहे कश्चन कार्यक्रमः आसीत्।कार्यक्रमार्थं विभिन्स्थलेभ्यः विभिन्नाः जनाः आगताः। कः कुतः आगतवान्। इति अधः निर्दिष्टम् अस्ति। तदाधारेण वाक्यानि रचयन्तु।

| | |
|---|---|
| मैसूर<br>काशी<br>तुमकूर<br>मण्ड्य<br>चित्रदुर्ग<br>मद्रास्<br>कलकत्ता<br>कोलार<br>ग्रामः<br>दावणगेरे | मातुलः<br>अनुजः<br>स्नेहितः<br>भगिनी<br>अग्रजः<br>भागिनेयः<br>अनुजा<br>गुरुः<br>पितामहः<br>मातामही |

1. मैसूरुतः मातुलः आगतवान्।

1. ..........................................................।
2. ..........................................................।
3. ..........................................................।
4. ..........................................................।
5. ..........................................................।
6. ..........................................................।
7. ..........................................................।
8. ..........................................................।
9. ..........................................................।

गोविन्दस्य गृहस्य कार्यक्रमार्थं विविधस्थानतः विविधानि वस्तूनि आनीतानि। कस्मात् किम् आनीतम् इति अधः निर्दिष्टम् अस्ति। तदाधारेण वाक्यानि रचयन्तु।

| | |
|---|---|
| आपणः<br>वित्तकोशः<br>विपणिः<br>उद्यानम्<br>मित्रगृहम्<br>प्रतिवेशीगृहम्<br>शाला<br>ग्रामः<br>जलाधारः<br>क्षीरकेन्द्रम् | तण्डुलाः<br>धन<br>शाकाः<br>आम्रपर्णानि<br>वस्त्रकटाः<br>पात्राणि<br>दीर्घपीठानि<br>कदलीपत्राणि<br>जलम्<br>क्षीरम् |

1. आपणतः तणडुलाः नीतः।
2. .......... .......... .............।
3. .......... .......... .............।
4. .......... .......... .............।
5. .......... .......... .............।
6. .......... .......... .............।
7. .......... .......... .............।
8. .......... .......... .............।
9. .......... .......... .............।
10. .......... .......... .............।

| | |
|---|---|
| रावणः<br>हरिणः<br>सर्पः<br>चोरः<br>राक्षसः<br>मूषकः<br>गो | रामः<br>व्याघ्रः<br>गृध्रः<br>आरक्षकः<br>देवः<br>मार्जारः<br>सिंहः |

ii. यस्मात् भीतिः भवति, तस्य पदस्य पञ्चमीविभक्तिः भवति।
उदा- व्याघ्रात् जनाः भीतः भवन्ति।
अभ्यासः -कः कस्मात् भीतः इति अधः निर्दिष्टम् अस्ति। तदाधारेण वाक्यानि रचयन्तु।
रावणः रामात् भीतः अस्ति।

....... .......... ...........।
....... .......... ...........।
....... .......... ...........।
....... .......... ...........।
....... .......... ...........।
....... .......... ...........।
....... .......... ...........।
....... .......... ...........।
....... .......... ..........।

### iii. यदा रक्षणं भवति तदा यस्मात् रक्षणं प्राप्यते तस्य पञ्चमी विभक्तिः भवति।

उदा- देवः अपायात् मां रक्षितवान्।

अभ्यासः कः कस्मात् कं रक्षितवान् इति अधः सूचितम् अस्ति। तदाधारेण वाक्यानि रचयन्तु।

विष्णुः मकरः गजेन्द्रः। 1. विष्णुः मकरतः गजेन्द्रम् रक्षितवान्।

राजा शत्रुः जनाः 2.................................................................................।

रामः रावणः सीता 3. .................................................................................।

सैन्यः शत्रु देशः 4. .................................................................................।

देवः कष्टानि भक्तः 5. .................................................................................।

स्वामी कष्टः छात्रः 6. .................................................................................।

कृष्णः बकासुरः गोकुलम् 7. .................................................................................।

आरक्षकः चोरः जनः। 8. .................................................................................।

iv. बहिः आरभ्य ऋते पूर्वं परः इत्येतेषां शब्दानां प्रयोगे पञ्चमी विभक्तिः भवति। उदा सः गृहतः बहिः गतवान्।

- गुरुवासरात् आरभ्य मम परीक्षा।
- देवात् ऋते कः भक्तं रक्षेत्?
- सायं कालात् पूर्वं भवता प्राप्तव्यम्।
- आषाढः ज्येष्ठात् परः।
- फरवरीमासः जनवरी परः।

**v. आवरणे दत्तानां शब्दानाम् उचितैः पञ्चम्यन्तरूपैः रिक्तानि स्थलानि पूरयन्तु।**

1) ...........................(देवालयः)भक्ताः सन्ति।
   **देवालयात् बहिः भक्ताः सन्ति।**
2) किमर्थं जनाः .........................(कार्यालयः) बहिः स्थिताः दृश्यन्ते
3) .........................................(सप्ताहः)आरभ्य छात्राणां सङ्ख्या वर्धिता ।
4) .........................................(पठनम्) पूर्वं ध्यानम् करोतु।
5) .........................................(उत्थानम्) परं भूमिं नमस्करोतु।
6) .........................................(आरक्षकः)ऋते दुष्टं निग्रहीतुम् कः शक्नुयात्
7) ऋते....................................(भवान्), अन्यः कोपि एवं न कथितवान्।
8) अस्यां क्रीडायां यः ................(रेखा), बहिः गच्छति सः बाह्यः भवति।
9) .........................................(सूर्योदयः) आरभ्यः कृषिकः कार्यं करोति।
10) भवान्.................................(शयनम्) पूर्वं देवप्रार्थनाम् करोतु।
11) मूषकस्य...............................(बिलम्) बहिः मार्जारः प्रतीक्षां करोति।
12) उपदेशस्य ............................(श्रवणम्) परं मम खेदः निर्गतः।
13) .........................................(आपणः) बहिः कानिचन वस्तूनि पतितानि सन्ति।

### vi. पञ्चमी विभक्तिः।

⇒ विभागे सति अवधिभूतस्य पञ्चमी विभक्तिः भवति।

⇒ यस्मात् भयं भवति तस्य पञ्चमी विभक्तिः भवति।

⇒ यस्मात् रक्षणं तस्य पञ्चमी विभक्तिः भवति।

⇒ ऋते प्रयोगे पञ्चमी विभक्तिः भवति।

⇒ प्रभृति आरभ्य इत्येतयोः प्रयोगे पञ्चमी विभक्तिः भवति।

⇒ बहिः योगे पञ्चमी विभक्तिः भवति।

⇒ पूर्व पर इत्येतयोः प्रयोगे अपि पञ्चमी विभक्तिः भवति।

# 2.6|| षष्ठीविभक्तिः||

## |विभक्तिश्लोकौ|


आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः | क्षिप्रम् अक्रियमाणस्य कालः पिबति तद्रसम् ||

पापानां शोधकं नित्यं परानन्दस्य बोधकम् | रोचकं चित्तवृत्तीनां भजध्वं नाम मङ्गलम् ||

i. यत्र सम्बन्धः दृश्यते तत्र सम्बन्धवाचकस्य पदस्य षष्ठी भवति|

उदा- एषा रामस्य लेखनी|

अभ्यासः दिलीपः कश्चन गृहस्थः | तस्य बान्धवाः अधः निर्दिष्टाः सन्ति| दिलीपस्य इतरेषां च सम्बन्धं वाक्यैः निर्दिशन्तु|




1. दिलीपः.................. ................. ...................|
2. दिलीपः.................. ................. ...................|
3. दिलीपः.................. ................. ...................|
4. दिलीपः.................. ................. ...................|
5. दिलीपः.................. ................. ...................|
6. दिलीपः.................. ................. ...................|
7. दिलीपः.................. ................. ...................|
8. दिलीपः.................. ................. ...................|
9. दिलीपः.................. ................. ...................|
10. दिलीपः.................. ................. ...................|

**ii. उचितैः षष्ठ्यन्तरूपैः रिक्तस्थालानि पूरयन्तु|**

यथा- श्रीकृष्णः पाण्डवाः ..........................रक्षकः|

श्रीकृष्णः पाण्डवानां रक्षकः|

1. (धनिकाः)........................................................भवनानि उन्नतानि भवन्ति|
2. (जनः) ........................................................ रुचिः भिन्नं भवन्ति|
3. (बालकाः) ......................................................फलितांशेन अध्यापकः सन्तुष्टः
4. (भवन्तः) .......................................................आचरेण वयं तुष्टाः|
5. (वयम्) ........................................................कार्यालयः सुविशालः अस्ति|
6. भवतः(कुञ्चिकाः) ..........................................गुच्छः कुत्र स्थापितवान्?
7. एषु दिनेषु(वस्तूनि) ........................................मूल्यं वर्धितम्|

**iii. पठनम्  श्रवणम् गमनम् च इत्यादीनि पदानि भाववाचकानि इति उच्यन्ते। एतादृशानां भाववाचकपदानां योगे कर्मपदस्य कर्तृपदस्य च षष्ठी विभक्तिः भवति। उदा -**

1. रामस्य आगमने विलम्बः नास्ति।(कर्तृपदस्य षष्ठी)
2. पुस्तकस्य अध्ययनेन ज्ञानं वर्धते। (कर्मपदस्य षष्ठी)

**आवरणे दत्तानां पदानां षष्ठीविभक्त्यन्तरूपैः रिक्तस्थानानि पूरयन्तु।**

यथा- (गीतं )..................श्रवणेन अहं सन्तुष्टः। गीतस्य <u>श्रवणेन</u> अहं सन्तुष्टः।

1. (योग्यः).......................................(आहारः)...................सेवनेन शक्तिः वर्धते।
2. (ग्रन्थाः).......................................अध्ययनम् एव(सरस्वती) .................पूजा।
3. सा (विषयाः).........................................................प्रतिपादनं सम्यक् कृतवान्।
4. अद्य प्रातः काले (कार्यक्रमः)......................................उद्घाटनम् जातम्।
5. भवान् सत्वरं(पुस्तकानि)..........................................सङ्ग्रहं करोतु।
6. (वस्त्रादीनि)..........................................दानेन पुण्यं लभ्यते।
7. पण्डितः सदा (ग्रन्थाः).............................परिशीलनं करोति।
8. कर्मकरी(पात्राणि)...................................प्रक्षालनं कृत्वा गेहं यास्यति।
9. कर्णः इन्द्राय (कवचं कुण्डलं च )...................दानम् अकरोत्।
10. अहं (मूल्याङ्काः, नाणकानि च)........................सङ्ग्रहं करोमि।

अभ्यासः- उमाकान्तस्य दिनचर्यायाः कानिचन कार्याणि निर्दिष्टानि। कोष्ठकं दृष्ट्वा कस्य अनन्तरं किं जातम् इति लिखन्तु।

| |
|---|
| 5 वादनम् उत्थानम्<br>6 वादनम् देवप्रार्थना<br>7 वादनम् योगासनम्<br>7.30 वादनम् अल्पाहारः<br>8 वादनम् विद्यालयगमनम्<br>8.30 वादनम् विद्यालयप्राप्तिः<br>9. वादनम् प्रार्थना<br>9.20 वादनम् कक्षायाम् अध्ययनम्<br>4. वादनम् विद्यालयात् निर्गमनम्<br>4.30 वादनम् गृहप्राप्तिः(गृहे अध्ययनम्)<br>5.30 वादनम् क्रीडार्थम् गमनम्।<br>7. वादनम् स्नानम्- प्रार्थना।<br>7.30 वादनम् - अध्ययनम्।<br>8. वादनम् - रात्रिभोजनम्<br>8.20 वादनम् - अध्ययनम्<br>10 वादनम् -  निद्रा। |

उदा-  उमाकान्तः उत्थानस्य अनन्तरं देवप्रार्थनां करिष्यति।

1. ..........................................................................।

2. ..........................................................................।
3. ..........................................................................।
4. ..........................................................................।
5. ..........................................................................।
6. ..........................................................................।
7. ..........................................................................।
8. ..........................................................................।
9. ..........................................................................।

**षष्ठी विभक्तिः।**

⇒ सम्बन्धे षष्ठीविभक्तिः भवति।

⇒ भाववाचकस्य षष्ठी भवति।

⇒ क्रियापदानां विभज्य प्रयोगे कर्मणः षष्ठी भवति।

## 2.6।। सप्तमीविभक्तिः।।

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे साधवो न हि सर्वत्र चन्दनं न वने वने हितोपदेश॥

न देवो विद्यते काष्ठे न पाषाणे न मृण्मये। भावेषु विद्यते देवः तस्मात् भावो हि कारणम्।।

परनिन्दासु पाणडित्यं स्वेषु कार्येषु अनुद्यमः। प्रद्वेषश्च गुणज्ञेषु पन्थानो ह्यपदां त्रयः।।

i. सर्वेषामपि वस्तूनां कोपि आधारः भवति एव । एवं यः आधारः भवति तस्य सप्तमी विभक्तिः भवति।

उदा- मम गृहे एकः श्वानः अस्ति।

अभ्यासः- अधः सूचितानाम् आधारभूतान् शब्दान् शब्दानाम् आश्रित्य वाक्यानि रचयन्तु।

भारतदेशः-कर्नाटक-कलबुर्गी-कमलापुरः-नवनीहालः-सत्यसाई विश्वविद्यालयः।

1. भारतदेशे कर्नाटकम् अस्ति।

1) ........................................................।
2) ........................................................।
3) ........................................................।
4) ........................................................।
5) विश्वविद्यालयः – प्रकोष्ठः - ग्रन्थालयः – ग्रन्थः- भगवद्गीता – श्रीकृष्ण-अर्जुनसंवादः।

उदा-

1) विश्वविद्यालये प्रकोष्ठः अस्ति।
2) ...............................................।
3) ...............................................।
4) ...............................................।
5) ...............................................।
6) ...............................................।

पाठशाला – वाटिका – लता – शाखा - पुष्पम् - भ्रमरः।

1. उदा पाठशालायां वाटिका अस्ति।
2. ...............................................................।
3. ...............................................................।
4. ...............................................................।
5. ...............................................................।
6. ...............................................................।

ii. संस्कृताध्ययने मम रुचिः अस्ति। इति वाक्ये रुचिः इत्यस्य आधारः संस्कृताध्ययनम् भवति। एषः विषयरूपः आधारः। एतादृशस्य आधारस्य अपि सप्तमी भवति।

अभ्यासः – आवरणे दत्तानां शब्दानाम् उचितैः रूपैः रिक्तस्थलानि पूरयन्तु।

यथा- (सः)............................भवतः अनादरः मास्तु। तस्मिन् भवतः अनादरः मास्तु।

1. (संस्कृतम्)................................जनाः प्रीतिं प्रदर्शयन्ति।
2. शरीरस्य(अलङ्कारः)......................मम रुचिः नास्ति।
3. (मधुरखाद्यम्)...............................एतावती आसक्तिः किमर्थम्?
4. देवः (भक्तः)................................कृपां प्रदर्शयति।

5. (चित्रलेखनम्)................................बालकस्य अतीव आसक्तिः।

**iii. स्निह्यति विश्वसिति इत्येतयोः धातोः प्रयोगः यत्र भवति तत्र स्नेहस्य विश्वासस्य च यत् पात्र तस्य सप्तमी विभक्तिः भवति।**

उदा – रमेशः गणेशे विश्वसिति। आवरणे दत्तानां शब्दानाम् उचितैः रूपैः रिक्तस्थलानि पूरयन्तु।

1. सः वञ्चकः । अतः (सः) ..............................मा विश्वसितु।
2. ये (जनाः) .................स्नेहं प्रदर्शयन्ति (ते) ...................जनाः स्निह्यन्ति।
3. रावणः (स्वशक्तिः).....................अधिकं विश्वसितवान्।
4. (यानम्).................................विश्वस्य गतः अहम् अग्रे गतवान्।
5. भवतः (वचनानि)......................विश्वस्य अहम् अग्रे गतवान्।
6. दशरथः (पुत्राः).......................अधिकं स्निह्यति स्म।
7. यः (दुर्जनाः) ............................स्निह्यति सः अवश्यं हानिं प्राप्नोति।
8. (राजकीयजनाः)........................भवन्तः कदापि न विश्वसन्तु।

**iv. अभ्यासः -**उदा - लक्ष्मी-विष्णुः –वक्षस्थलम् –अस्ति। लक्ष्मी विष्णोः वक्षस्थले अस्ति।

1. आरक्षकः चोरः कण्ठः गृहीतवान्।
2. ..........................................।
3. राक्षसी-सीता-केशाः-गृहीतवती।
4. ..........................................।
5. बालकः अन्यबालकः कपोलः ताडितवान्।
6. ............................................।
7. बालकः – अन्यबालकः- कपोलः-ताडितवान्।
8. ............................................।
9. माता –पुत्रः(प्रीत्या)-पुस्तकं-ताडितवती।
10. ............................................।
11. मल्लः – अन्यमल्लः – उदरं-ताडितवान्।
12. ............................................।
13. योधः – शत्रुः –कण्ठः –प्रहृतवान्।
14. ............................................।

**V. नारायणः कश्चनसरलः कृषिकः। सः सर्वेषु विविधान् भावान् प्रदर्शयति। भावपात्राणि प्रथमादिक्रमेण सङ्ख्यया निर्दिष्टानि। तेषां सप्तम्यन्तरूपैः अधस्तनवाक्यानि पूरयन्तु।**

1. सः 2. एषः 3. सा 4. एषा 5 भवान् 6 भवती 7. अहम् 8.ते 9.एते 10. भवन्ती 11.ताः 12.भवत्यः 13. एताः 14.वयम्।

उदा नारायणः तस्मिन् आदरं प्रदर्शयति।

1. नारायणः ............................................प्रीतिं पदर्शयति।
2. नारायणः ............................................आसक्तिं प्रदर्शयति।
3. नारायणः ............................................विनयं प्रदर्शयति।
4. नारायणः ............................................वात्सल्यं प्रदर्शयति।
5. नारायणः ............................................मैत्रीं प्रदर्शयति।
6. नारायणः ............................................श्रद्धां प्रदर्शयति।

7. नारायणः ............................................स्नेहं प्रदर्शयति।
8. नारायणः ............................................नम्रतां प्रदर्शयति।
9. नारायणः ............................................प्रेमप्रदर्शयति।
10. नारायणः ............................................गौरवं प्रदर्शयति।
11. नारायणः ...........................................विधेयतां प्रदर्शयति।
12. नारायणः ............................................भक्तिं प्रदर्शयति।
13. नारायणः ............................................ विशेषादरं प्रदर्शयति।

**सप्तमी**

⇒ आधारस्य सप्तमी विभक्तिः भवति। (विषयसप्तमी)

⇒ विश्वसिति स्निह्यति प्रयोगे सप्तमी विभक्तिः भवति।

⇒ सत्सप्तमी।

⇒ पृथक्करणे सप्तमीविभक्तिः भवति।

# 2.7 ।।सम्बोधनम्।।

i. रामः गोविन्दः गौरी लता इत्यादीनां सर्वेषां शब्दानां सम्बोधनरूपाणि एकवचने प्रथमाविभक्तितः भिन्नानि भन्ति। (द्विवचने, बहुवचने च प्रथमाविभक्तिरूपाणि एव सम्बोधनरूपाणि अपि।) सम्भोधनसमये, हे भो अये अयि रे इत्यादीनि अव्ययानि अपि कदाचित् उपयुज्यन्ते।

| **प्रथमाविभक्तिः** | **सम्बोधनरूपम्** | **प्रथमाविभक्तितः भेदः** |
|---|---|---|
| रामः | राम! | सम्बोधने विसर्गः न दृश्यते। |
| गोविन्दः | गोविन्द! | सम्बोधने विसर्गः न दृश्यते। |
| मित्रम् | मित्र! | सम्बोधने मकारः न दृश्यते। |
| सीता | सीते! | सम्बोधने अ कारः न दृश्यते। ए कारः भवति। |
| मान्या | मान्ये! | |
| गौरी | गौरी! | सम्बोधने ई कारस्य ह्रस्वः भवति। |
| भगिनी | भगिनि! | |
| लक्ष्मीः | लक्ष्मी! | विसर्गस्य अश्रवणं च। |
| अम्बा | अम्ब! | सम्बोधने ह्रस्वःअ कारः। |

**अभ्यासः – आवरणे दत्तानां शब्दानाम् उचित्तैः रूपैः रिक्तस्थलानि पूरयन्तु।**

यथा .................भवान् कुत्र गच्छति?(गोविन्दः) गोविन्द ! भवान् कुत्र गच्छति?

1. ...........................................................! भवान् सेवकम् आह्वयतु।(कृष्णः)
2. ...........................................................! अत्र अगच्छतु तावत्।(भगिनी)
3. ...........................................................! श्वः मम गृहम् आगच्छतु भोः।
4. ...........................................................! श्वः मम गृहम् आगच्छतु भो(मित्रम्)
5. ……………………………..…………! अद्य सायं मम आगमने विलम्बः भवेत्।
6. ...........................................................! चिन्ता मा करोतु भवती।(मालिनी)
7. ...........................................................! अन्तः आगच्छामि वा?(आर्यः)
8. ...........................................................! तस्य अर्थं पुनः वदतु।
9. किमर्थम् अद्य आगमने विलम्बः?(लक्ष्मीः)
10. भवती किमर्थं मौनं स्थितवती?(सीता)

## ii. ।। युक्तं रूपं चित्वा रिक्तस्थले लिखन्तु ।।

1. लता अद्य ......................................गतवती।(कार्यालयः, विद्यालयः, देवालये)
2. महिला...........................................आनयति।(लेखन्यः, अङ्कनीः, स्यूताः)

1) अस्माकं .........................................परितः क्रीडाङ्गणम् अस्ति।(शालायाः, शालां, शालायाम्)

2) ....................................................उभयतः छात्राः सन्ति।(अध्यापकं, अध्यापकस्य, अध्यापकात्)
3) याचकः...........................................धनं प्रार्थयति।(धनिकाय, धनिकात्, धनिकम्)
4) एषः ..............................................सह विपणिं गतवती।(भगिनीं , भगिन्यां , भगिन्याः)
5) सः ...............................................विना कार्यालयं गतवान्।(घटिः , घटीं , घटेः)
6) अनन्तः ..........................................पत्रं लिखति।(लेखन्या, लेखनीतः, लेखन्याः)
7) राधा..............................................पत्रं लिखति। (सख्ये, अग्रजेन, अनुजम्)
8) एतानि पुस्तकानि ...............................ददातु। (बालिकान्, बालिकाभ्यः , बालिकेभ्यः)
9) ....................................................नमः इति भक्ताः वदन्ति।(देव्यै, देवीं, देवायै)
10) प्रातः उत्थाय अहं..............................नमामि। (देवाय, देवं, देवायै)
11) दिनेशः............................................क्रुध्यति।(भगिन्यै, भगिन्यां, भगिन्याः)
12) वयं ...............................................भीताः स्म।(दुर्जनैः, दुर्जनीभ्यः, दुर्जानानाम्)
13) श्रीकृष्णं द्रौपदीं .................................रक्षितवान्।(कौरवेभ्यः, कौरवैः, कौरवान् )
14) मित्र ! ......……………………..ऋते अन्यं शरणं गच्छामि।(भवतः, भवते, भवता)
15) ....................................................समाप्तेः अनन्तरम् अहम् आगतः।(कार्यक्रमम्, कार्यक्रमे, कार्यक्रमस्य)
16) ....................................................भोजनवस्तूनि सन्ति।(पाकशाले, पाकशालायां, पाकशालायाः)
17) भोः सः मिथ्यावदी । अतः.......................................मा विश्वसितु।(तं, तस्मिन्, तस्मै)
18) भीमः बकासुरं .....................................................प्रहृतवान्।(उदरे, उदरम्, उदराय)
19) ..........................................! महती बुभुक्षा खलु मम। (अम्बा, अम्बे, अम्बा)
20) ..........................................! एकां कथां कथयतु। (तावत् , भगिनी , भगिने)
21) ..........................................! मा गच्छतु तत्र। (अरविन्दः, अरविन्द ,अरविन्दो)
22) जनाः ...................................सञ्चारं कुर्वन्ति। लोकयान्यैः, लोकयानेषु, लोकयानात्)
23) रुक्मिणी..............................असूयति(राधायां, राधायै, राधायाः)

**iii. अधः दत्तेषु वाक्येषु प्रतिवाक्यम् एकः विभक्तिदोषः अस्ति। दोषयुक्तं शब्दं रेखया अङ्कयित्वा वाक्यस्य अन्ते आवरणे शुद्धं शब्दरूपं लिखन्तु।**

1) यथा-माता पुत्रीन् आह्वयति। (................) माता <u>पुत्रीन्</u> आह्वयति।(पुत्रीं)
2) अहम् अद्य लेखन्यः आनीतवती। (.................................................................)
3) पाचकाः छुरिकायाः शाकानि कर्तयति। (.................................................................)
4) श्रीकृष्णः चक्रात् जरासन्धं मारितवान्। (.................................................................)
5) पिता पुत्रीयाय धनस्यूतं दत्तवान्। (.................................................................)
6) किमर्थं भवान् तं विश्वसितवान्? (.................................................................)
7) दन्तानां विना चर्वणं न शक्यते। (.................................................................)
8) भवतः सह कः आगतवान् (.................................................................)
9) सर्पेण भीतः सः पलायितवान्। (.................................................................)
10) छात्राः! कोलाहलः अलम्। (.................................................................)
11) किमर्थं छात्राः अध्यापकस्य परितः स्थिताः सन्ति।(.................................................................)
12) एतत् युतकं भवान् कति रूप्यकेषु क्रीतवान्? (.................................................................)
13) निःस्थानतः अहं त्रिचक्रिकायाम् आगतवान्।(.................................................................)
14) अयि !लक्ष्मी भक्तानां प्रिय खलु भवती। (.................................................................)
15) कस्य वा रोचयते एषः कार्यक्रमः? (.................................................................)
16) मयि क्रुध्यति चेत् कः लाभः भवतः? (.................................................................)
17) अब्दुलकलां बालेभ्यः बहु स्निह्यति स्म। (.................................................................)
18) आत्मीयान् विश्वस्य सः हानिं प्राप्तवान्। (.................................................................)
19) एतेन किं भीतः भवान्? (.................................................................)
20) कार्यक्रमम् समाप्य नन्तरं सर्वे उत्थितवन्तः। (.................................................................)
21) हयः अहम् अपघातेन रक्षितः अभवम्। (.................................................................)

**पाणिनीयसूत्राणि।-**

- o पृथग्विनानानाभिस्तृतीयान्यतरस्याम्।
- o अन्तरान्तरेऩ युक्ते।
- o सहयुक्ते अप्रधाने ।
- o नमस्स्वस्तिस्वाहास्वधालमवषट्योगाच्च।
- o क्रुध्द्रुहेर्ष्यासूयार्थानां यं प्रतिः कोपः।
- o सूच्यर्थानां प्रीयमाणः।
- o स्पृहेरीप्सितः।
- o भीत्रार्थादीनां भयहेतुः।

**सारांशः भवता पठितम् एतेविचाराः-**

**प्रथमा विभक्तिः।**

- ⇒ कर्तरि प्रयोगे कर्तुः प्रथमा विभक्तिः भवति।
- ⇒ कर्मणिप्रयोगे कर्मणः प्रथमा विभक्तिः भवति।

**द्वितीया विभक्तिः।**

- ⇒ कर्तरि प्रयोगे कर्मणः द्वि विभक्तिः भवति।
- ⇒ सकर्मकधातूनां प्रयोगे कर्तरी कर्मणि च प्रयोगे क्त्वान्तात्।
- ⇒ ल्यबन्तात् च पूर्वं द्वितीया विभक्तिः भवति।
- ⇒ सकर्मकधातूनां प्रयोगे (कर्तरी कर्मणि )द्वितीयविभक्तिः भवति।
- ⇒ तुमन्नन्तात् शतृन्तात् च पूर्वं द्वितीयाविभक्तिः भवति।
- ⇒ परितः शब्दात् पूर्वं द्वितीया विभक्तिः भवति
- ⇒ विना प्रयोगे द्वितीया विभक्तिः भवति।
- ⇒ उभयतः प्रयोगे द्वितीयाविभक्तिः भवति।
- ⇒ द्विकर्मकधातूनां प्रयोगे कर्मणोः द्वितीया विभक्तिः भवति।

**तृतीया विभक्तिः।**

- ⇒ करणे तृतीयाविभक्तिः भवति।
- ⇒ भावे प्रयोगे कर्मणि प्रयोगे।
- ⇒ सह प्रयोगे तृतीया विभक्तिः भवति।
- ⇒ सदृश प्रयोगे तृतीया विभक्तिः भवति।
- ⇒ करणवाचकस्य तृतीया विभक्तिः भवति।
- ⇒ अलम् योगे तृतीया विभक्तिः भवति।

**चतुर्थी विभक्तिः।**

- ⇒ ददाति इत्यर्थे यस्म्यै ददाति तस्मै चतुर्थी विभक्तिः भवति।
- ⇒ रोचते प्रयोगे यस्मै रोचते तस्य चतुर्थी विभक्तिः भवति।
- ⇒ नमः प्रयोगे चतुर्थी विभक्तिः भवति।
- ⇒ क्रुध्यति असूयति द्रुह्यति ईर्ष्यति इत्येतेषां धातूनां प्रयोगे चतुर्थी विभक्तिः भवति।

**पञ्चमी विभक्तिः।**

- ⇒ विभागे सति अवधिभूतस्य पञ्चमी विभक्तिः भवति।
- ⇒ यस्मात् भयं भवति तस्य पञ्चमी विभक्तिः भवति।
- ⇒ यस्मात् रक्षणं तस्य पञ्चमी विभक्तिः भवति।
- ⇒ ऋते प्रयोगे पञ्चमी विभक्तिः भवति।
- ⇒ प्रभृति आरभ्य इत्येतयोः प्रयोगे पञ्चमी विभक्तिः भवति।
- ⇒ बहिः योगे पञ्चमी विभक्तिः भवति।
- ⇒ पूर्व पर इत्येतयोः प्रयोगे अपि पञ्चमी विभक्तिः भवति।

**षष्ठी विभक्तिः।**

- ⇒ सम्बन्धे षष्ठीविभक्तिः भवति।
- ⇒ भाववाचकस्य षष्ठी भवति।
- ⇒ क्रियापदानां विभज्य प्रयोगे कर्मणः षष्ठी भवति।

**सप्तमी**

- ⇒ आधारस्य सप्तमी विभक्तिः भवति। (विषयसप्तमी)
- ⇒ विश्वसिति स्निह्यति प्रयोगे सप्तमी विभक्तिः भवति।
- ⇒ सत्सप्तमी।
- ⇒ पृथक्करणे सप्तमीविभक्तिः भवति।

## ।।तृतीयः पाठः।।
### 3.1।। पठनम् ।।

उच्चारणे माधुर्यम् स्पष्टता पदच्छेदः स्वरेण सहितम् धैर्यम् लयम् सामर्थ्यम् स्यात् इति । स च श्लोकः एवम् अस्ति। यथा-

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः | धैर्यं लयसमर्थं च षडेते पाठका गुणाः ||**

पाठकाधमाः एवं भवन्ति। गीती शीघ्री अर्थात् यः शीघ्रं पठति, पुनः पठनकाले शिरः वृथा कंपति अनर्थज्ञः अल्पस्वरेण पठति एते षड्दोषाः भवन्ति। पाणिनीय शिक्षायाम् एवम् उल्लिखितम् अस्ति।

**गीती शीघ्री शिरः कम्पी तथा लिखित पाठकः ।**
**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥**

----------------पाणिनीयशिक्षा

शिक्षां व्याख्यास्यामः ॥ वर्णः, मात्रा, बलं, साम, सन्तानः, इत्युक्तः शिक्षाध्याये'॥

उपनिषदानुसारेण इत्येतानि षडङ्गानि भवन्ति शिक्षाविषयस्येति।

(१) वर्णस्य अभिप्रायः अक्षराणि भवन्ति । वेदतत्त्वस्य ज्ञानार्थं संस्कृतवर्णमालायाः ज्ञानं नितान्तम् आवश्यकमस्ति । पाणिनीयशिक्षातः ज्ञानं भवति यत्, संस्कृतवर्णमालायां ६३ अथवा ६४ वर्णाः निर्धारिताः भवन्ति । न केवलमियं संख्या संस्कृतभाषार्थमेव, प्रत्युत वैदिककाले प्रयुक्तं प्राकृतभाषार्थमपि नियता आसीत्।

(२) स्वरस्याभिप्रायः - उदात्तानुदात्तस्वरितैः सहास्ति ।

(३) मात्राशब्देन उच्चारणसापेक्षसमय एवास्ति । मात्रा त्रिधा भवति - ह्रस्व-दीर्घ-प्लुताश्चेति । एकमात्रो भवेद् ह्रस्वः, द्विमात्रो दीर्घ उच्यते, तथा त्रिमात्रो प्लुतसंज्ञको भवति ।

(४) बलेन स्थानप्रयत्नयोः बाधो भवति । स्वर-व्यञ्जनयोः उच्चारणकाले ताल्वादि यत्स्थानस्य वायुना स्पर्शो भवति, तदैव स्थानमिति । स्थानानि च इमानि अष्टसंख्यकानि भवन्ति । प्रयत्नोऽपि द्विधा भवति- आभ्यन्तरो बाह्यश्चेति । अभ्यन्तरप्रयत्नः चतुर्धा विभक्तोऽस्ति - स्पृष्ट-ईषत्स्पृष्ट-विवृत-संवृतभेदात् । बाह्यप्रयत्नोऽपि एकादशधा - विवार-संवार-श्वास-नाद-घोष-अघोष-अल्पप्राण-महाप्राण-उदात्तस्वरिताश्चेति ।

(५) सामशब्दस्यार्थो भवति — 'साम्यम्' अर्थात् दोषरहितम् अनुदात्त-माधुर्यादिगुणयुक्तमुच्चारणम् । तद्यथा -

**'माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः। धैर्यं लयसमर्थञ्च षडेते पाठका गुणाः।।'**

विपरीतमस्य अधमपाठकेषु परिगणितप्रकाराणां निर्देशोऽपि तत्रैव । यथा -

**'गीती शीघ्री शिरः कम्पी यथा लिखितपाठकः॥ अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाऽधमाः॥**

शकि्तभीतादिपाठोऽपि अनर्थको भवति। यथा -

**'शङ्कितं भीतमुत्कृष्टमव्यक्तमनुनासिकम्। काकस्वरं शिरसिंगं तथा स्थानविवर्जितम्।।**

**उपांशुदष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्। निष्पीडितं ग्रस्तपदाक्षरश्च वदेन्न दीनं न तु सानुनास्यम्।।**

## ।।संस्कृतम्।।

लोके सर्वे अपि जनाः व्यवहारार्थं भाषामेव अवलम्बन्ते। तथा च बहुधा भाषाः लोके द्रष्टुं शक्यन्ते।एतासु भाषासु संस्कृतमपि एका भाषा। एषा भाषा अति पुरातना। अस्याः देवभाषा इत्यपि अन्यनाम अस्ति। भारते सप्तग्रामेषु संस्कृतेन एव व्यवहरन्ति। भारते चतुर्विंशति सहस्राधिकानां जनानां संस्कृतम् मातृभाषा अस्ति।

संस्कृतभाषायां वेदाः इतिहासः पुराणानि स्मृतयः काव्यनाटकादीनि च सन्ति। तत्र वेदाः ऋग्वेदः युजुर्वेदः सामवेदः अथर्ववेदः इति चत्वारः।श्रीमद् वाल्मीकिविरचितं रामायणम् आदिकाव्यम् व्यासविरचितम् महाभारतम् च संस्कृते एव सन्ति।

जगत्प्रसिद्धा भगवद्गीता महाभारते एव अन्तर्भवति। पुराणानि अष्टादश सन्ति। मनस्मृतिः याज्ञवल्क्यस्मृतिः इत्यादयः स्मृतयः। काव्येषु रघुवंश कुमारसंभवः किरातार्जुनीयम् शिशुपालवधं नैषधम् इति पञ्चमहाकाव्यानि प्रसिद्धानि । अभिज्ञानशाकुन्तलम् उत्तररामचरितम् इत्यादीनि नाटकानि अतीवसुन्दराणि सन्ति।

संस्कृताय वैज्ञानिकभाषा इत्यपि प्रसिद्धा। यतः बीजगणितम् त्रिकोणमिति ज्यामिति भौतशास्त्रं खगोलशास्त्रम् वैद्यकीयम् इत्यादयः प्रसिद्धाः सन्ति।आर्यभटः भास्कराचार्यः सुश्रुतः इत्यादयः संस्कृते विख्यातः विज्ञानिनः। अतः एव प्रथम उपग्रहस्य नाम आर्यभटः इति । चाणक्यसदृशाः अनेकाः राजनैतिककृतयः धनुर्वेदग्रन्थाः सङ्गीतग्रन्थाः रचिताः।

आधुनिक काले अपि संस्कृतम् अत्यावश्यकम्। संस्कृतकृतीन् आधृत्य विज्ञानिनः अनेकान् विचारान् आविष्कृतवन्तः। भारतीयसंस्कृतिः संस्कृतेन एव सम्बद्धा अस्ति।तस्मात् एव जनाः संस्कृतम् इच्छन्ति। वयं भारतीयसंस्कृतिरक्षणार्थं जीवने शान्तिसाधनार्थं विज्ञाने विशिष्टं साधयितुं संस्कृतभाषाभ्यासं प्रयत्नेन कुर्मः। एवं च उक्तम्

**।।भाषासु मुख्या मधुरा गीर्वाण भारती।।**

# ||चतुर्थः पाठः||
# ||लेखनम्||
## 4.1 **||पत्रलेखनम्||**

**श्रीः**

दिनाङ्कः 24-5-2020
स्थानम् –कलबुर्गी

**सकाशात्,**
...............................
.................................
**सविधे,**
.................................
...................................
.................................

प्रियमित्र!

अहम् अत्र कुशली । भवान् अपि कुशली इति चिन्तयामि।
.................................................| ...................................................|

धन्यवादः

भवदीयः

**श्रीः**

**दिनाङ्कः 24-5-2020**
**स्थानम् –कलबुर्गी**

**सकाशात्**
रविः
श्री सत्यसाई मानव अभ्युदयविश्वविद्यालयः
बि ए 4 सेमिस्टर

**सविधे**
श्री मञ्जुनाथः
गृहसंख्या 24
महालक्ष्मी ले अउट्
चिक्कबल्लापुर

प्रियमित्र! सादरं प्रणामः

अत्र वयं सर्वे कुशलिनः। भवानपि कुशली इति पत्रद्वारा ज्ञातवान्। भवान् संस्कृतलेखनप्रशिक्षणवर्गं गमिष्यति इति ज्ञात्वा सन्तुष्टः अभवति।

मम अध्ययनं सम्यक् प्रचलति। अहम् अध्ययने परिश्रमः करोमि। अत्र पठनार्थम् माम् सर्वे प्रोत्साहनं कुर्वन्ति। संस्कृतभाषाशिक्षणम् अपि प्रचलति। अत्र अद्यत्वे संस्कृतेन एव व्यवहरन्ति। पुनः आगत्य मिलामि । शुभं भवतु।

धन्यवादः

भवदीयः
रविः

## 4.2|| प्रबन्धलेखनम् ||

लेखने लेखननियमानि सन्ति। संस्कृते प्राचीनकाले विरामचिह्नम् (comma) अर्धविरामादयो चिह्नानि न उपयुज्यन्ते स्म। परन्तु अद्यत्वे उपयोगं कुर्मः। पर्णविरामचिह्नम् "।" ,

अर्धविरामचिह्नम् ";"। संस्कृतभाषायाम् इति शब्दः पूर्णविरामस्थाने उपयुज्यमानः आसीत्। क्वचित् स्थलेषु सम्पूर्णम् अलम् शम् इत्यादयः शब्दाः अपि दृश्यन्ते। समासभरितानां लेखनम् श्रेष्ठः मन्यते।

प्रबन्धलेखने त्रयः अंशाः अपेक्षन्ते।

1) शीर्षकः
2) प्रस्तावना
3) विषयः
4) सारांशः

## 4.3 || लेखनकौशलम् ||

**स्वरे परे।**

१ माता अनुजं आहूतवती । २ गिरीशः मधुरं इच्छति । ३ ललिता कारणं ऊहते ।

उपरितनेषु वाक्येषु अनुस्वारः यः लिखितः सः दोषाय ।

प्रथमवाक्ये 'अनुज'शब्दे जकारोत्तरम् अनुस्वारः लिखितः अस्ति । तस्य पुरतः 'आ'कारः अस्ति ।
द्वितीयवाक्ये 'मधुर'शब्दे रकारोत्तरम् अनुस्वारः लिखितः । तस्य पुरतः 'इ'कारः अस्ति ।
तृतीयवाक्ये 'कारण'शब्दे णकारोत्तरम् अनुस्वारः लिखितः । तस्य पुरतः 'इ'कारः अस्ति ।

**नियमः - अनुस्वारात् स्वरे परे मकारः एव लेखनीयः, न तु अनुस्वारः ।**

अतः तानि वाक्यानि एवं लेखनीयानि ।

१ माता अनुजम् आहूतवती । २ गिरीशः मधुरम् इच्छति । ३ ललिता कारणम् ऊहते ।

**व्यञ्जने परे।**

१ शिशुः कन्दुकम् नयति । २ नव्या शाटिकाम् पश्यति । ३ विक्रमः मित्रम् ताडयति ।

उपरितनेषु वाक्येषु अनुस्वारस्य स्थाने मकारस्य लेखनं दोषाय ।

प्रथमवाक्ये 'कन्दुक'शब्दे ककारोत्तरम् मकारः लिखितः अस्ति । तस्य पुरतः 'न'कारः अस्ति ।
द्वितीयवाक्ये 'शाटिका'शब्दे काकारोत्तरम् मकारः लिखितः अस्ति । तस्य पुरतः 'प'कारः अस्ति ।
तृतीयवाक्ये 'मित्र'शब्दे रकारोत्तरम् मकारः लिखितः अस्ति । तस्य पुरतः 'त'कारः अस्ति ।

**नियमः - अनुस्वारात् व्यञ्जने परे अनुस्वारः एव लेखनीयः, न तु मकारः ।** अतः तानि वाक्यानि एवं लेखनीयानि ।

१ शिशुः कन्दुकं नयति । २ नव्या शाटिकां पश्यति । ३ विक्रमः मित्रं ताडयति ।

**वाक्यस्य अन्ते।**

१ सुमनया क्षीरं पीतं ।
२ सन्दीपेन कार्यं करणीयं ।
३ महेशेन पद्यं पठितं ।

**एते वाक्याः दोष पूर्णाः । नियमः - अवसाने अपि मकारः एव लेखनीयः । तस्मात्** अतः तानि वाक्यानि एवं लेखनीयानि ।

१ सुमनया क्षीरं पीतम् ।
२ सन्दीपेन कार्यं करणीयम् ।
३ महेशेन पद्यं पठितम् ।

**अभ्यासः**

---

**अधः दत्तानि वाक्यानि शुद्धं लिखत ।**

१ सात्त्विकजीवनम् यापितवान् कश्चन वृद्धः कदाचित् शय्यां आश्रितवान् ।
२ किञ्चित् श्रीगन्धचूर्णं पुष्पम् फलं च आनीयतां ।
३ सत्यं उक्तं भवता ।
४ अन्येन दत्तम् स्वीकर्तुं न इच्छति मम मित्रं ।
५ अनुजेन सह अधिकम् सम्भाषणम् न कृतं ।

**परसवर्णलेखनम्।**

संस्कृतभाषां देवनागरीलिप्या लेखनावसरे केषुचित् विषयेषु अवधातव्यं भवति । तेषु अनुस्वार-मकारयोः लेखनं कश्चन विषयः। अपरः अंशः अस्ति परसवर्णलेखनम् । अत्र सः विषयः प्रस्तूयते ।

**नित्यम् ।**

अधः लिखितानि पदानि परिशीलयत ।

अंगणम् पंकजम्, क्रौंचः, गांधारम्, किंतु, गच्छंति, चिंतयति, चंद्रः, शांतिः, परंपरा, चंपकम्, तंबूरम्, कंटकः, अंडम्, कंडोलः किम् एतानि शुद्धानि ? न । अनुस्वारस्य पुरतः वर्गीयव्यञ्जनानि यवलाश्च यदा भवन्ति तदा सदृशः परसवर्णः लेखनीयः । सूत्रम् - अनुस्वारस्य ययि परसवर्णः (८-४-५८) इति पाणिनिसूत्रम् । एतादृशेषु स्थलेषु परसवर्णरहितानि (अनुस्वारसहितानि) रूपाणि असाधूनि एव । अतः उपरिलिखितानां शब्दानां शुद्धानि रूपाणि एवं सन्ति -

अङ्गणम्, पङ्कजम्, क्रौञ्चः, गान्धारम्, किन्तु, गच्छन्ति, चिन्तयति, चन्द्रः, शान्तिः, परम्परा, चम्पकम्, तम्बूरम्, कण्टकः, अण्डम्, कण्डोलः, इदं नित्यं सम्भवति ।

विकल्पेन पदान्ते तु परसवर्णः विकल्पेन । सूत्रम् - अनुस्वारस्य ययि परसवर्णः (८-४-५८) इति पाणिनिसूत्रम् ।

अतः ;

- ✔ सङ्घटनम् / संघटनम्
- ✔ सञ्चयः / संचयः
- ✔ सम्भवति / संभवति

इति रूपद्वयमपि साधु एव । उपसर्गस्य पदत्वं (पदसंज्ञा) अस्ति इत्यतः ।

**अभ्यासः**

अधः दत्तान् शब्दान् शुद्धं लिखत ।

किंचित् , भूखंडः, गंतुम् , पारांतरितम् , संक्षिप्तम् , दंपती, संबंधः,

**द्वित्वम्**

केषाञ्चित् पदानां लेखनावसरे केचन वर्णाः द्विवारं लेखनीयाः भवन्ति । उच्चारणश्रवणात् एतत् द्वित्वं यद्यपि न अनुभवगोचरतां याति, तथापि लेखनावसरे तु तत् लेखनीयम् एव । कानिचन उदाहरणानि अधः दत्तानि सन्ति -

द्वित्वम् (सामान्यम् - १)

| अशुद्धानि | शुद्धानि |
|---|---|
| महत्वम् | महत्त्वम् (महत् + त्वम्) |
| सत्वम् | सत्त्वम् (सत् + त्वम्) |

| | |
|---|---|
| तत्वम् | तत्त्वम् (तत् + त्वम्) |
| सात्विकम् | सात्त्विकम् |
| उज्वलः | उज्ज्वलः (उत् + ज्वल) |
| पाश्चात्यः | पाश्चात्त्यः (पश्चात् + त्यक्) |
| कार्तिकमासः | कार्त्तिकमासः |
| तज्ञः | तज्ज्ञः (तत् + ज्ञः) |
| कित्वम् | कित्त्वम् (कित् + त्वम्) |
| छित्वा | छित्त्वा (छिद् + त्वा) |
| भित्वा | भित्त्वा (भिद् + त्वा) |
| उध्वस्तः | उद्ध्वस्तः (उत् + ध्वस्तः) |

अधारग्रन्थाः
1. भाषाप्रवेशः- संस्कृतभारती-नवदेहली।
2. व्यवहारप्रदीपः- द्वितीयदीक्षा, वेम्पटि कुटुम्बशास्त्री राष्ट्रियसंस्कृतसंस्थानम्। नवदेहली
3.विकीपीडिया-
4. अभ्यासपुस्तकम्-संस्कृतभारती नवदेहली।